No. २४० ख

Title पातञ्जलयोगसूत्रं (१), [illegible] भाष्यो-[illegible] । (२)

Author महर्षिः पतञ्जलिः (१)। महर्षि [illegible] (२)

Extent ३२ पत्र Age सं. १८६०

Subject योग शास्त्र

॥ ३४ ॥

पातञ्जलयोगसूत्रम्

नं. २४०

तदेव तमसानुविद्धमधर्माज्ञानावैराग्यानैश्वर्योपगं भवति । तदेव प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्यैश्वर्योपगं भवति । तदेव रजोलेशमलापेतं स्वरूपप्रतिष्ठं सत्त्वपुरुषान्यताख्यातिमात्रं धर्ममेघध्यानोपगं भवति । तत्परं प्रसंख्यानमित्याचक्षते ध्यायिनः । चितिशक्तिरपरिणामिनी अप्रतिसंक्रमा दर्शितविषया शुद्धा चानन्ता च सत्त्वगुणात्मिका चेयमतो विपरीता विवेकख्यातिरिति अतस्तस्यां विरक्तं चित्तं तामपि ख्यातिं निरुणद्धि तदवस्थं संस्कारोपगं भवति । स निर्बीजः समाधिर्न तत्र किंचित्संप्रज्ञायत इत्यसंप्रज्ञातो द्विविधः । स योगश्चित्तवृत्तिनिरोध इति तदवस्थे चेतसि विषयाभावाद्बुद्धिबोधात्मा पुरुषः किंस्वभाव इति तदा द्रष्टुः स्वरूपेऽवस्थानं स्वरूपप्रतिष्ठा तदानीं चितिशक्तिर्यथा कैवल्ये व्युत्थानचित्ते तु सति तथापि भवन्ती न तथा कथं तर्हि विषयत्वात् वृत्तिसारूप्यमितरत्र व्युत्थाने याश्चित्तवृत्तयस्तदविशिष्टवृत्तिः पुरुषः तथा च सूत्रं एकमेव दर्शनं ख्यातिरेव दर्शनमिति । चित्तमयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि

१ रिदृश्यत्वेन स्वं भवति पुरुषस्य स्वामिनस्तस्माच्चित्तवृत्तिबोधे पुरुषस्यानादिसम्बन्धो हेतुस्ताः पुनर्निरोद्धव्या
बहुत्वे सति चित्तस्य ॥४॥ वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ॥ क्लेशहेतुकाः कर्माशयप्रचये क्षेत्रीभूताः
क्लिष्टाः ख्यातिविषया गुणाधिकारविरोधिन्योऽक्लिष्टाः। क्लिष्टप्रवाहपतिता अप्यक्लिष्टाः। क्लिष्टच्छि-
द्रेष्वपि अक्लिष्टा भवन्ति अक्लिष्टच्छिद्रेषु क्लिष्टा इति। तज्जातीयकाः संस्कारा वृत्तिभिरेव क्रि-
यन्ते संस्कारैश्च वृत्तय इति एवं वृत्तिसंस्कारचक्रमनिशमावर्तते। तदेवंभूतं चित्तमवसिताधि-
कारमात्मकल्पेन व्यवतिष्ठते। प्रलयं वा गच्छतीति ५ ताः क्लिष्टाः क्लिष्टाश्च पञ्चधा वृत्त-
यः ५ प्रमाणविपर्ययविकल्पनिद्रास्मृतयः। तत्र प्रत्यक्षानुमानागमाः प्रमाणानि
इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात्तद्विषया सामान्यविशेषात्मनोऽर्थस्य
वर्याना विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणम्। फलमविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः। बु-
द्धेः प्रतिसंवेदी पुरुष इत्युपरिष्टादुपपादयिष्यामः। अनुमेयस्य तुल्यजातीयेष्वनु-
वृत्तो भिन्नजातीयेभ्यो व्यावृत्तः संबन्धो यस्तद्विषया सामान्यावधारणप्रधाना वृत्तिरनुमानम्।

यथा देशान्तरप्राप्तेर्गतिमच्चन्द्रतारकं चैत्रवद्विन्ध्यश्चाप्राप्तेर्न गतिः। आप्तेन दृष्टो ऽनुमितो वार्थः
परत्र स्वबोधसंक्रान्तये शब्देनोपदिश्यते शब्दात् तदर्थविषया वृत्तिः श्रोतुरागमः। यस्याश्रद्धेयार्थो वक्ता न
दृष्टानुमितार्थः स आगमः प्लवते। मूलवक्तरि तु दृष्टानुमितार्थे निर्विप्लवः स्यात्। विपर्ययो मिथ्या
ज्ञानमतद्रूपप्रतिष्ठं। कस्मान्न प्रमाणं यतः प्रमाणेन बाध्यते। भूतार्थविषयत्वात् प्रमाणस्य तत्र प्रमाणेन
बाधनमप्रमाणस्य दृष्टं तद्यथा द्विचन्द्रदर्शनं सद्विषयेनैकचन्द्रदर्शनेन बाध्यत इति। सेयं पञ्चपर्वा भवत्यविद्या
अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशा इति एत एव स्वसंज्ञाभिस्तमो मोहो महामोहस्तामिस्रो ऽन्धता
मिस्र इति। एते चित्तमलप्रसङ्गेनाभिधास्यन्ते ॥ ८ ॥ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः। स
न प्रमाणोपारोही न विपर्ययोपारोही। वस्तुशून्यत्वे ऽपि शब्दज्ञानमाहात्म्यनिबन्धनो व्यवहारो दृश्यते।
तद्यथा चैतन्यं पुरुषस्य स्वरूपमिति। यदा चितिरेव पुरुषस्तदा किमत्र केन व्यपदिश्यते। भवति च व्यपदेशे वृत्तिः।
यथा चैत्रस्य गौरिति। तथा प्रतिषिद्धवस्तुधर्मा निष्क्रियः पुरुषः तिष्ठति बाणः स्थास्यति स्थित इति गतिनिवृत्तौ
धात्वर्थमात्रं गम्यते। तथानुत्पत्तिधर्मा पुरुष इति उत्पत्तिधर्मस्याभावमात्रमवगम्यते न पुरुषान्वयी धर्मः।

तस्माद्विकल्पितः स धर्मस्तेन वास्ति व्यवहार इति ॥ अभावप्रत्ययालंबना वृत्तिर्निद्रा । सा च सम्प्रबोधे प्रत्य
वमर्षात्प्रत्ययविशेषः । कथं सुखमहमस्वाप्सं प्रसन्नं मे मनो लघूनि मे गात्राणि प्रज्ञां मे विशारदीकरोति दुः
खमहमस्वाप्सं स्त्यानं मे मनो भ्रमत्यनवस्थितं । गाढं मूढोहमस्वाप्सं गुरूणि मे गात्राणि क्लान्तं मे चित्तं
अलसं मुषितमिव तिष्ठति । स खल्वयं प्रबुद्धस्य प्रत्यवमर्षो न स्यादसति प्रत्ययानुभवे तदाश्रिताः स्मृत
यः प्रतीतिविषयाः न स्युस्तस्मात्प्रत्ययविशेषो निद्रा । सा च समाधावितरप्रत्ययवन्निरोधव्येति ॥ अनुभूतविषया
संप्रमोषः स्मृतिः किंप्रत्ययस्य चित्तं स्मरति आहोस्विद्विषयस्येति । ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासः
तथाजातीयकं संस्कारमारभते । स संस्कारः स्वव्यञ्जकाञ्जनः तदाकारामेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जन
यति । तत्र ग्रहणाकारपूर्विका बुद्धिः ग्राह्याकारपूर्वा स्मृतिः सा च द्वयी भावितस्मर्तव्या चाभावितस्मर्तव्या च । स्व
प्ने भावितस्मर्तव्या जाग्रत्समये त्वभावितस्मर्तव्येति सर्वाश्चैताः स्मृतयः प्रमाणविपर्ययविकल्पनिद्रास्मृतीना
मनुभवात्प्रभवन्ति सर्वाश्चैता वृत्तयः सुखदुःखमोहात्मिकाः सुखदुःखमोहाश्च क्लेशेषु व्याख्येयाः । सुखानुशयी रागः ।
दुःखानुशयी द्वेषः मोहः पुनरविद्येति एताः सर्वा वृत्तयो निरोधव्याः आसां निरोधे संप्रज्ञातो वासम्प्रज्ञातो वा समाधिर्भवति ।

वहति

असंप्रज्ञातो येति अथाऽसां निरोधकः उपाय इति १२ अभ्यासवैराग्याभ्यां तन्निरोधः। चित्तनदीनामोभय
तो वाहिनी वहति कल्याणाय पापाय च या तु कैवल्यप्राग्भारा विवेकविषयनिम्ना सा कल्याणवहा संसारप्राग्भारा
विवेकविषयनिम्ना या त्ववहासा। तत्र वैराग्येण विषयेभ्यस्रोतः खिलीक्रियते विवेकदर्शनाभ्यासेन कल्याणस्रोत
उद्घाटत इत्युभयाधीनश्चित्तवृत्तिनिरोधः ११ तत्र स्थितौ यत्नोऽभ्यासः। चित्तस्यावृत्तिकस्य प्रशान्तवाहिता स्थि
ति तदर्थं प्रयत्नवीर्यमुत्साह इत्यर्थः संपिपादयिषया तत्साधनानुष्ठानमभ्यासः १२ स तु दीर्घकालनैरंतर्यसत्कारा नै
सेवितो दृढभूमिः। दीर्घकालासेवितो निरन्तरासेवितस्तपसा ब्रह्मचर्येण श्रद्धया च सम्पादितः। सत्कारवान् दृढ
भूमिर्भवति व्युत्थानसंस्कारेण द्रागित्येवानभिभूतविषय इत्यर्थः १३ दृष्टानुश्रविकविषयवितृष्ण
स्य वशीकारसंज्ञा वैराग्यं स्त्रियोऽन्नं पानमैश्वर्यमिति दृष्टविषयवितृष्णस्य स्वर्गवैदेह्यप्रकृतिलयत्वप्रा
प्तावानुश्रविकविषये वितृष्णस्य दिव्यादिव्यविषयसंप्रयोगेऽपि चित्तस्य विषयदोषदर्शिनः प्रसंख्यानबला
दनाभोगात्मिका हेयोपादेयशून्या वशीकारसंज्ञा वैराग्यम् १४ तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्।
दृष्टानुश्रविकविषयदोषदर्शी विरक्तः पुरुषदर्शनाभ्यासात्तच्छुद्धिप्रविवेकाप्यायितबुद्धिः। गुणेभ्यो व्यक्ताव्यक्त

नो

न्याफ़ुकेभ्यो विरक्त इति द्वितीयं वैराग्यम्। नन्व यदुत्तरं तज्ज्ञान प्रसादमात्रम्। यस्योदये प्रत्युदितख्यातिरिति
क्रान्त भावनीय स्थिति रेवं मन्यते प्राप्तं प्रापणीयं क्षीणाः क्षेतव्याः क्लेशाः छिन्नः श्लिष्टपर्वा भवसंक्र
मो यस्याविच्छेदाज्जनित्वा म्रियते मृत्वा च जायते इति। ज्ञानस्यैव पराकाष्ठा वैराग्यमेतस्यैव हि नान्तरीय
कं कैवल्यं इति। अथोपायद्वयेन निरुद्धचित्तवृत्तेः कथमुच्यते संप्रज्ञातः समाधिरिति। १७ वितर्कवि
चारानन्दास्मितारूपानुगमात्संप्रज्ञातः। वितर्कश्चित्तस्यालम्बने स्थूल आभोगः। सूक्ष्मो विचारः।
आनन्दो ह्लादः। एकात्मिका संविदस्मिता। तत्र प्रथमः चतुष्टयानुगतः समाधिः सवितर्कः। द्वितीयो वितर्क
विकलः सविचारः। तृतीयो विचारविकलः सानन्दः। चतुर्थस्तद्विकलोऽस्मितामात्र इति सर्व एते सा
लम्बनाः समाधयः। अथासम्प्रज्ञातः समाधिः किमुपायः किंस्वभावो वेति विरामप्रत्ययाभ्यासपूर्वः सं
स्कारशेषोऽन्यः॥ सर्ववृत्तिप्रत्यस्तमये संस्कारशेषो निरोधः। चित्तस्य समाधिरसंप्रज्ञातस्तस्य परं
वैराग्यमुपायः। सालम्बनो ह्यभ्यासस्तत्साधनाय न कल्पत इति विरामप्रत्ययो निर्वस्तुक आलम्बनी क्रिय
ते। स चार्थशून्यस्तदभ्यासपूर्वं चित्तं निरालम्बनमभावप्राप्तमिव भवतीत्येष निर्बीज समा

धिरसम्प्रज्ञातः। स खल्वयं द्विविधः उपायप्रत्ययो भवप्रत्ययश्च तत्रोपायप्रत्ययो योगिनो भवति। भव
प्रत्ययो विदेहप्रकृतिलयानाम्॥ विदेहानां देवानां भवप्रत्ययः ते हि स्वसंस्कारमात्रोपभोगेन चित्तेन
कैवल्यपदमेवानुभवन्तः स्वसंस्कारविपाकं तथाजातीयकमतिवाहयन्ति तथा प्रकृतिलयाः साधि
कारे चेतसि प्रकृतिलीने कैवल्यपदमिवानुभवन्ति यावन्न पुनरावर्तते अधिकारवशाच्चित्तमिति
१९॥ श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्। उपायप्रत्ययो योगिनां भवति। श्रद्धा चेतसः स
म्प्रसादः सा हि जननीव कल्याणी योगिनं पाति तस्य हि श्रद्दधानस्य विवेकार्थिनो वीर्यमुपजायते।
समुपजातवीर्यस्य स्मृतिरुपतिष्ठते स्मृत्युपस्थाने च चित्तमनाकुलं समाधीयते। समाहितचित्तस्य प्र
ज्ञाविवेक उपावर्तते येन यथार्थं वस्तु जानाति तदभ्यासात् तद्विषयाच्च वैराग्याद् असम्प्रज्ञातः समा
धिर्भवति। ते खलु नव योगिनो मृदुमध्याधिमात्रोपाया भवन्ति। तद्यथा मृदूपायो मध्योपायोऽधि
मात्रोपाय इति। तत्र मृदूपायस्त्रिविधः। मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेग इति। तथा मध्योपायस्त
थाधिमात्रोपाय इति। तत्राधिमात्रोपायानां तीव्रसंवेगानामासन्नः समाधिलाभः समाधिफलञ्च

भवतीति ।१९। मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः । मृदुतीव्रो मध्यतीव्रोऽधिमात्रतीव्र इति ततोऽपि विशेषः ।
मृदुतीव्रसंवेगस्यासन्नतमः समाधिलाभः समाधिफलञ्च भवति । किमेतस्मादेवासन्नतरः समाधिर्भव
ति । अथास्ति लाभे भवत्यन्योऽपि कश्चिदुपायो न वेति ।२०। ईश्वरप्रणिधानाद्वा । प्रणिधानाद्भक्तिविशेषा
दावर्जित ईश्वरस्तमनुगृह्णात्यभिध्यानमात्रेण । तदभिध्यानादपि योगिनामासन्नतरः समाधिला
भः समाधिफलं च भवतीति । अथ चेतनपुरुषव्यतिरिक्तः कोऽयमीश्वरो नामेति ।२१। क्लेश....
.... ।अत्र त्यक्तपत्रद्वयस्य पाठो नष्टः। .... ॥
तेनानवच्छेदात् । पूर्वे हि गुरवः कालेनावच्छिद्यन्ते यत्रावच्छेदार्थेन कालो नोपावर्तते स एष पूर्वे
षामपि गुरुः यथास्य सर्गस्यादौ प्रकर्षगत्या सिद्धस्तथातिक्रान्तसर्गादिष्वपि प्रत्येतव्यः ।२४। तस्य
वाचकः प्रणवः । वाच्य ईश्वरः प्रणवस्य । किमस्य संकेतकृतं वाच्यवाचकत्वमथ प्रदीपप्रकाशव
दवस्थितमिति । स्थितोऽस्य वाच्यस्य वाचकेन सम्बन्धः । संकेतस्त्वीश्वरस्थितमेवार्थमवद्योत
यति यथावस्थितः । पितापुत्रयोः संबन्धः संकेतेनावद्योत्यते अयमस्य पिता अयमस्य पुत्र इति सं स

र्गान्तरेष्वपि वाच्यवाचकशक्त्यपेक्षस्तथैव संकेतः क्रियते सम्प्रतिपत्तिनित्यतया नित्यः शब्दा
र्थसंबन्ध इत्यागमिनः । प्रतिस्तानते विस्तालवा च्यवाचकत्वस्य योगिनः ।२५। तज्जपस्तदर्थभाव
नम् ॥ प्रणवस्य जपः प्रणवाभिधेयस्य ईश्वरस्य भावनं तस्य योगिनः प्रणवं जपतः प्रणवा
र्थञ्च भावयतश्चित्तमेकाग्रं संपद्यते । तथा चोक्तम् । स्वाध्यायाद्योगमासीनो योगात्स्वाध्याय
मामनयेत् ॥ स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते । इति किञ्चास्य भवति ।२६। ततः प्रत्यक्चेतना
धिगमोऽप्यन्तरायाभावश्च येनावदन्तरायाः व्याधिप्रभृतयस्ते तावदीश्वरप्रणिधानान्न भव
न्ति । स्वरूपदर्शनमप्यस्य भवति । यथैवेश्वरः पुरुषः शुद्धः प्रसन्नः केवलोऽनुपसर्गस्तथायम
पि बुद्धेः प्रतिसंवेदी यः पुरुषस्तमधिगच्छति । अथ केऽन्तरायास्ये चित्तस्य विक्षेपाः के पुनस्ते क्रियन्तो
वेति ।२७। व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थित
त्वानि चित्तविक्षेपास्तेऽन्तरायाः । नवान्तरायाश्चित्तस्य विक्षेपाः सहैते चित्तवृत्तिभिर्भवन्त्येषा
मभावे न भवन्ति पूर्वोक्ताश्चित्तस्य वृत्तयः । तत्र व्याधिर्धातुरसकरणवैषम्यम् । स्त्यानमक-

५ र्गायता चित्तस्य संशय उभयकोटिस्पृग्विज्ञानं स्यादिदमेवं नैवं स्यादिति। प्रमादः समाधिसाधनानामभावनम्। आलस्यं कायचित्तगुरुत्वादप्रवृत्तिः। अविरतिश्चित्तस्य विषयसंप्रयोगात्मा गर्द्धः। भ्रान्तिदर्शनं विपर्ययज्ञानम्। अलब्धभूमिकत्वं समाधिभूमेरलाभः। अनवस्थितत्वं लब्धायां भूमौ चित्तस्याप्रतिष्ठा। समाधिप्रतिलम्भे हि तदवस्थितं स्यादिति। एते चित्तविक्षेपा नव योगमलाः। योगप्रतिपक्षा योगान्तराया इत्यभिधीयन्ते ॥३०॥ दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः। —प
दुःखमाध्यात्मिकमाधिभौतिकमाधिदैविकं च येनाभिहताः प्राणिनस्तदपघाताय यतन्ते तद्दुःखम्।

॥ . . . . अत्रत्यः पञ्चपत्रद्वयपाठो नष्टः . . . . ॥

नमबाधमानमनेनासेव्यमिति भण्यते। स्वाध्यायः प्रणवादिपवित्राणां जपो मोक्षशास्त्राध्ययनं वा। ईश्वरप्रणिधानं सर्वक्रियाणां परमगुरावर्पणं तत्फलसंन्यासो वा। स हि क्रियायोगः। समाधिभावनार्थः क्लेशतनूकरणार्थश्च। स हि आसेव्यमानः समाधिं भावयति। क्लेशांश्च प्रतनूकरोति। प्रतनूकृतान् क्लेशान् प्रसंख्यानाग्निना दग्धबीजकल्पानप्रसवधर्मिणः करिष्यतीति। तेषां तनूकरणात्पुनः क्लेशैरपरा

रामृष्टा सत्वपुरुषान्यतामात्रख्यातिः। सूक्ष्मा प्रज्ञा समाप्ताधिकारा प्रतिप्रसवाय कल्पिष्यत इति।
अथ के क्लेशाः कियन्तो वेति। अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः॥३॥ क्लेशा इति पञ्च विप-
र्यया इत्यर्थः। ते स्यन्दमाना गुणाधिकारं द्रढयन्ति परिणाममवस्थापयन्ति। कार्यकारणस्रोत उन्न-
मयन्ति। परस्परानुग्रहतंत्री भूत्वा कर्मविपाकं चाभिनिर्हरन्ति। अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनु-
विच्छिन्नोदाराणाम्॥४॥ अत्राविद्या क्षेत्रं प्रसवभूमिरुत्तरेषामस्मितादीनां चतुर्विधकल्पितानां प्रसुप्ततनु-
विच्छिन्नोदाराणां तत्र का प्रसुप्तिश्चेतसि शक्तिमात्रप्रतिष्ठानां बीजभावोपगमस्तस्य प्रबोध आ-
लम्बने संमुखीभावः। प्रसंख्यानवतो दग्धक्लेशबीजस्य संमुखीभूतेप्यालम्बने नासौ पुनरस्ति।
दग्धबीजस्य कुतः प्ररोह इति अतः क्षीणक्लेशः कुशलश्चरमदेह इत्युच्यते तत्रैव सा दग्धबीजभावः पञ्च-
मी क्लेशावस्था नान्यत्रेति। सतां क्लेशानां तदा बीजसामर्थ्यं दग्धमिति विषयस्य संमुखीभावेऽपि सति
न भवत्येषां प्रबोध इति उक्ता प्रसुप्तिः। दग्धबीजानामप्रबोधश्च तनुत्वमुच्यते। प्रतिपक्षभावनोपहताः
क्लेशास्तनवो भवन्ति। तथा विच्छिद्य विच्छिद्य तेन तेनात्मना पुनः पुनः समुदाचरन्ति इति विच्छिन्ना। कथं रा

५त

गकाले क्रोधस्यादर्शनात् नहि रागकाले क्रोधः समुदाचरति । रागश्च क्वचिद्दृश्यमानो न विषयान्तरे नास्ति
नैकस्यां स्त्रियां चैत्रो रक्त इति अन्यासु स्त्रीषु विरक्त इति किन्तु तत्र रागो लब्धवृत्तिः । अन्यत्र तु भविष्यद्वृत्ति
रिति । स हि तदा प्रसुप्ततनुविच्छिन्नो भवति । विषये यो लब्धवृत्तिः स उदारः सर्व एवैते क्लेशविषयत्वं नाति
क्रामन्ति । कस्तर्हि विच्छिन्नः प्रसुप्तस्तनुरुदारो वा क्लेश इत्युच्यते सत्यमेवैतत् किन्तु विशिष्टानामेवैषां
विच्छिन्नादित्वम् यथैव प्रतिपक्षभावनातो निवृत्तस्तथैव स्वव्यञ्जकाञ्जनेनाभिव्यक्त इति । सर्व एवा
मी क्लेशा अविद्याभेदाः कस्मात् सर्वेष्वविद्यैवाभिप्लवते । यदविद्यया वस्त्वाकार्यते तदेवानुशेरते
क्लेशाः । विपर्यासप्रत्ययकाल उपलभ्यन्ते ॥ . . . . अत्र त्वयैकपदमात्रपाठो न कृतः . . . . . . ॥
दुःखानुशयी द्वेषः । दुःखाभिज्ञस्य दुःखानुस्मृतिपूर्वो दुःखे तत्साधने वा यः प्रतिघो मन्युर्जिघांसा क्रोधः
स द्वेष इति । स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः । ९ । सर्वस्य प्राणिन इयमात्माशीर्नित्या भवति ।
मा न भूवं भूयासमिति न चाननुभूतमरणधर्मकस्यैषा भवत्यात्माशीः एतया च पूर्वजन्मानुभवः प्रतीयते
स चायमभिनिवेशः क्लेशः स्वरसवाही कृमेरपि जातमात्रस्य प्रत्यक्षानुमानागमैरसंभावितो

मत्याग्गमावि देहदृष्टात्मकः सर्वगमानुमन्तं मरणदुःखमनुशीलयति। यथा वायमत्यन्तमूढेषु
दृष्टाति क्लेशः तथा विदुषोपि विज्ञात पूर्वापरान्तस्य रूढः। कस्मात् समाना ह्येतयोः कुशलाकुशल
योर्मरणदुःखानुभवादियं वासनेति। ते प्रतिप्रसवहेयाः सूक्ष्माः। ते पञ्च क्लेशा दग्धबीजकल्पाः
योगिनश्चरिताधिकारे चेतसि प्रलीने सहतेनैवास्तं गच्छन्ति। स्थितानां तु बीजभावोपगतानां ध्यान
हेयास्तद्वृत्तयः। क्लेशानां या वृत्तयः स्थूलास्ताः क्रियायोगेन तनूकृताः सत्यः प्रसंख्यानेन ध्यानेन हात
व्याः। यावत्सूक्ष्मीकृता यावद्दग्धबीजकल्पा इति। यथा वस्त्राणां स्थूलो मलः पूर्वं निर्धूयते पश्चात्सू
क्ष्मो यत्नेनोपायेनापनीयते। तथा स्वल्पप्रतिपक्षाः स्थूला वृत्तयः क्लेशानां सूक्ष्मास्तु महाप्रतिप
क्षा इति क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः ॥१२॥ तत्र पुण्यापुण्यकर्माशयः कामलोभमो
हक्रोधप्रभवः। स दृष्टजन्मवेदनीयश्चादृष्टजन्मवेदनीयश्च। तत्र तीव्रसंवेगेन मन्त्रतपःसमाधि
भिर्निर्वर्तित ईश्वरदेवतामहर्षिमहानुभावानामाराधनाद्यः परिनिष्पन्नः स सद्यः परि
पच्यते पुण्यकर्माशय इति॥ तथा तीव्रक्लेशेन भीतव्याधितकृपणेषु विश्वासोपगतेषु वा महानुभावेषु

गातत्वात्सितेषु कृतः पुनरपकारः स चापि पापकर्माशयः तत्र एव विपच्यते। यथा नन्दीश्वरः कुमारो म
नुष्यपरिणामं हित्वा देवत्वेन परिणतः तथा नहुषोऽपि देवानामिन्द्रः स्वकं परिणामं हित्वा तिर्यक्त्वे
न परिणत इति। तत्र नारकाणां नास्ति दृष्टजन्मवेदनीयः कर्माशयः क्षीणक्लेशानामपि नास्त्यदृष्ट
जन्मवेदनीयः कर्माशय इति। सति मूले तद्विपाको जात्यायुर्भोगाः १३। सत्सु क्लेशेषु कर्माशयो विपा
कारंभी भवति। नोच्छिन्नक्लेशमूलः। यथा तुषावनद्धाः शालितण्डुला अदग्धबीजभावाः प्ररोह
समर्थाश्च विनापनीततुषा दग्धबीजभावा वा। तथा क्लेशावनद्धः कर्माशयोऽपि विपाकप्ररोही भवति
अपनीतक्लेशो न प्रसंख्यानदग्धबीजभावो वेति॥ स च विपाकस्त्रिविधो जातिरायुर्भोग इति तत्र
विचार्यते। किमेकं कर्म एकस्य जन्मनः कारणम्। अथैकं कर्मानेकं जन्म निर्वर्तयति। इति द्वितीया धार
णा। किमनेकं जन्मानेकं कर्म निर्वर्तयति। अथानेकं कर्मैकं जन्म निर्वर्तयति। इति। न तावदेकं कर्मै
कस्य जन्मनः कारणम्। कस्मात् नाके कस्य प्रचितस्यासंख्येयेणावशिष्टस्य कर्मणः सांप्रतिकस्य च फलक्र
मानियमात्। अनाश्वासो लोकस्य प्रसक्तः स चानिष्ट इति नैकं कर्मानेकं जन्मनः कारणम्। कस्मादने

केषुजन्मसु एकैकमेककर्मानेकस्य जन्मनः कारणमित्यवधार्यस्य विपाककालाभावः प्रसक्तः स चा
प्यनिष्ट इति न चानेककर्मानेकजन्मकारणम्। कस्मात्तदनेकं जन्म युगपन्न भवतीति क्रमेणैव वाच्यम्।
तथा च पूर्वदोषानुषङ्गस्तस्माज्जन्मप्रायणान्तरे कृतः पुण्यापुण्यकर्माशयप्रचयो विचित्रः प्रधानोपसर्ज
नाभावेनावस्थितः प्रायेणाभिव्यक्तः एकप्रघट्टकेन मरणं प्रसाध्य संमूर्छित एकमेव जन्म करोति। तच्च ज
न्म केनैव कर्मणा लब्धायुष्कं भवति। तस्मिन्नायुषि तेनैव कर्मणा भोगः संपद्यते। असौ कर्माशयो
जन्मायुर्भोगहेतुत्वात् त्रिविपाकोऽभिधीयते। अत एकभविकः कर्माशय उक्त इति दृष्टजन्मवेदनीयस्त्वेक
वि विपाकारंभी भोगमात्रहेतुत्वात्। द्विविपाकारंभी वा आयुर्भोगहेतुत्वात्। नन्दीश्वरवन्नहुषवद्वेति क्लेशकर्मविपा
कानुभवनिर्वर्तिताभिस्तु वासनाभिरनादिकालसंमूर्छितमिदं चित्तं विचित्रीकृतमिव सर्व
तो मत्स्यजालं ग्रन्थिभिरिवाततं इत्येता अनेकभवपूर्विका वासना यस्त्वयं कर्माशय एष एवैकभ
विक उक्त इति ये संस्काराः स्मृतिहेतवस्ता वासनास्ताश्चानादिकालीना इति यस्त्वसावेकभविकः क
र्माशयः स नियतविपाकश्चानियतविपाकश्च तत्र दृष्टजन्मवेदनीयस्य नियतविपाकस्यैवा

ॐ

यं नियमो नत्व दृष्टजन्मवेदनी यस्यानियतविपाकस्य। कस्मात् योऽसावदृष्टजन्मवेदनीयोऽनियतविपाकस्तस्य त्रयी गतिः। कृतस्याविपक्वस्य नाशः प्रधानकर्मण्यावा . . . . . अत्रत्य एक पत्र द्वयस पाठो नष्टः . . . . ॥ पङ्के मग्न इति। एवा परिणाम दुःख स्य नाम प्रतिकूला सुखावस्थायामपि योगिनमेव क्लिश्नातीति। अथ का तापदुःखता सर्वस्य द्वेषानुविद्धश्चेतनाचेतनसाधनाधीनस्तापानुभव इति॥ तत्रास्ति द्वेषजः कर्माशयः सुखसाधनानि च प्रार्थयमानः कायेन वाचा मनसा च परिस्पन्दते। ततः परमनुगृह्णात्युपहन्ति चेति परानुग्रहपीडाभ्यां धर्माधर्मावुपचिनोति। स कर्माशयो लोभान्मोहाच्च भवतीत्येषा तापदुःखतोच्यते। का पुनः संस्कारदुःखता। सुखानुभवात्सुखसंस्काराशयो दुःखानुभवादपि दुःखसंस्काराशय इति दुःखानुभवादपि दुःखसंस्काराशयः कर्मभ्यो विपाकेऽनुभूयमाने सुखे दुःखे वा पुनः कर्माशयप्रचयः दुःखानुभवादपि दुःखसंस्काराशयः कर्मभ्यो विपाको इति॥ एवमिदमनादि दुःखस्रोतो विप्रसृतं कर्म योगिनमेव प्रतिकूलात्मकत्वादुद्वेजयति। कस्मादक्षिपात्रकल्पो हि विद्वानिति यथोर्णातन्तुरक्षिपात्रे न्यस्तः स्पर्शेन दुःखयति नान्ये

षु गात्रावयवेषु एवमेतानि दुःखानि अक्षिपात्रकल्पं योगिनमेव क्लिश्यन्ति नेतरं प्रतिपत्तारं क्लिश्यन्ति।
इतरन्तु स्वकर्मोपहृतं दुःखमुपात्तं त्यजन्तं त्यक्तं त्यक्तमुपाददानं अनादिवासनाविचित्रया चित्तवृत्त्या
समन्ततोऽनुविद्धमिवाविद्यया हातव्य एवाहंकारममकारानुपातिनं जातस्य। जातं बाह्याध्यात्मिकोभ
यनिमित्ता स्त्रीपर्वाणस्तापा अनुप्लवन्ते। तदेवं अनादिना दुःखस्रोतसा उह्यमानमात्मानं भूतग्रामं च दृष्ट्वा
योगी सर्वदुःखक्षयकारणं सम्यग्दर्शनं शरणं प्रतिपद्यत इति। गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकि
नः। प्रख्याप्रवृत्तिस्थितिरूपा बुद्धिगुणाः परस्परानुग्रहतन्त्रीभूत्वा शान्तं घोरं मूढं वा प्रत्ययं त्रिगुणमेवा
रभन्ते। चलं च गुणवृत्तमिति क्षिप्रपरिणामि चित्तमुक्तं रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरु
ध्यन्ते। सामान्यानि त्वतिशयैः सह प्रवर्तन्ते एवमेते गुणा इतरेतराश्रयेणोपार्जितसुखदुःखमोहप्रत्य
याः इति। सर्वे सर्वरूपा भवन्ति। गुणप्रधानभावकृतस्त्वेषां विशेष इति। तस्माद्दुःखमेव सर्वं विवेकिन इति।
तदस्य महतो दुःखसमुदायस्य प्रभवबीजमविद्या तस्याश्च सम्यग्दर्शनमभावहेतुः। यथा चिकि
त्साशास्त्रं चतुर्व्यूहं रोगो रोगहेतुरारोग्यं भैषज्यमित्येवमिदमपि शास्त्रं चतुर्व्यूहमेव। तद्यथा संसारः सं

सारहेतुः मोक्षो मोक्षोपाय एवेति। तत्र दुःखबहुलः संसारो हेयः प्रधानपुरुषयोः संयोगो हेयहेतुः। संयोगस्या
त्यन्तिकी निवृत्तिर्हानं हानोपायः सम्यग्दर्शनम्। तत्र हातुः स्वरूपमुपादेयं वा हेयं वा न भवितुमर्हतीति।
हाने तस्योच्छेदवादप्रसङ्गः। उपादाने च हेतुवादः। उभयप्रत्याख्याने शाश्वतवाद इत्येतत् सम्यग्दर्श
नम्। तदेतच्छास्त्रं चतुर्व्यूहमित्यभिधीयते। हेयं दुःखमनागतम्॥१६॥ दुःखमतीतमुपभोगेना
तिवाहितम्। न हेयपक्षे वर्तते। वर्तमानञ्च स्वक्षणे भोगारूढमिति न तत्क्षणान्तरे हेयता
मापद्यते। तस्माद्यदेवानागतं दुःखं तदेवाक्षिपात्रकल्पं योगिनं क्लिश्नाति। नेतरं प्रतिपत्ता
रं तदेव हेयतामापद्यते तस्माद्यदेव हेयमित्युच्यते। तस्यैव कारणं प्रतिनिर्दिश्यते द्रष्टृदृश्ययोः
संयोगो हेयहेतुः॥१७॥ द्रष्टा बुद्धेः प्रतिसंवेदी पुरुषः दृश्या बुद्धिसत्त्वोपारूढाः सर्वे धर्माः। तदेतद्दृश्य
मयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेन स्वं भवति पुरुषस्य दृशिरूपस्य स्वामिनः। अनु
भवकर्मविषयतामापन्नं अन्यस्वरूपेण प्रतिपन्नं अन्यस्वरूपेण प्रतिलब्धात्मकं स्वतन्त्रमपि परा
र्थत्वात्परतन्त्रम्। तयोर्दृग्दर्शनशक्त्योरनादिरर्थकृतः संयोगो हेयहेतुः दुःखस्य कारणमित्यर्थः॥

मा

तथा चोक्तम् । तत्संयोगहेतुविवर्जनात्स्यादयमात्यन्तिको दुःखप्रतीकारः कस्माद् दुःखहेतोः
परिहार्य्यस्य प्रतिकारदर्शनात् । तद्यथा पादतलस्य भेद्यता कंटकस्य भेत्तृत्वं परिहारः कंट
कस्य पादानधिष्ठानं पादत्राणव्यवहितेन वाधिष्ठानमेतत्त्रयं यो वेद लोके स तत्र प्रतीका
रमारभमाणो भेदजं दुःखं नाप्नोति । कस्मात्त्रित्वोपलब्धिसामर्थ्यादिति । अत्रापि तापक
स्य रजसः सत्त्वमेव तप्यं कस्मात्तपिक्रियायाः कर्मस्थत्वात्सत्त्वे कर्मणि तपिक्रिया नापरिणामि
नी निष्क्रिये क्षेत्रज्ञे दर्शितविषयत्वात्सत्त्वे तु तप्यमाने तदाकारानुरोधी पुरुषोऽनुतप्यत इति दृश्य
ते । दृश्यस्वरूपमुच्यते । प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् ॥१८॥ प्रका
शशीलं सत्त्वं क्रियाशीलं रजः स्थितिशीलं तम इति ॥ एते गुणाः परस्परोपरक्तप्रविभागाः परिणा
मिनः संयोगवियोगधर्माण इतरेतरोपाश्रयेणोपार्जितमूर्तयः परस्पराङ्गाङ्गित्वेऽप्यसंभिन्नशक्ति
प्रविभागास्तुल्यजातीयातुल्यजातीयशक्तिभेदानुपातिनः प्रधानवेलायामुपदर्शितसान्निध्याना गुणत्वेपि च व्यापार

मात्रेण प्रधानान्तर्नीतानुमिताः पुरुषार्थकर्तव्यतया प्रवृत्तिसामर्थ्याः सन्निधिमात्रोपकारिणोऽयस्का
न्तमणिकल्पाः प्रत्ययमन्तरेणैकतमस्य वृत्तिमनुवर्तमानाः प्रधानशब्दवाच्या भवन्ति एतद् दृश्यमि
त्युच्यते तदेतद् भूतेन्द्रियात्मकं भूतभावेन पृथिव्यादिना सूक्ष्मस्थूलत्वेन परिणमते तथेन्द्रियभावेन श्रोत्रा
दिना सूक्ष्मस्थूलत्वेन परिणमत इति ॥ तत्तु नाप्रयोजनमपि तु प्रयोजनमुररीकृत्य प्रवर्तत इति भोगापवर्गार्थं हि तद् दृश्यं
पुरुषस्येति। तत्रेष्टानिष्टगुणस्वरूपावधारणमविभागापन्नं भोगः भोक्तुः स्वरूपावधारणमप
वर्ग इति। द्वयोरतिरिक्तमन्यद्दर्शनं नास्ति तथा चोक्तम्। अयं तु खलु त्रिषु गुणेषु कर्तृष्व
कर्तरि च पुरुषे तुल्यातुल्यजातीये चतुर्थे तत्क्रियासाक्षिण्युपनीयमानान्सर्वभावानुपपन्ना
ननुपश्यन्नन्यद्दर्शनमन्यच्छङ्कत इति। ताावेतौ भोगापवर्गौ बुद्धिकृतौ बुद्धावेव वर्तमानौ क
थं पुरुषे व्यपदिश्येते इति। यथा विजयः पराजयो वा योद्धृषु वर्तमानः स्वामिनि व्यपदिश्यते स हि तत्फ
लस्य भोक्तेति। एवं बन्धमोक्षौ बुद्धावेव वर्तमानौ पुरुषे व्यपदिश्येते स हि तत्फलस्य भोक्तेति। बुद्धेरे
व पुरुषार्थापरिसमाप्तिर्बन्धस्तदर्थावसायो मोक्ष इति एतेन ग्रहणधारणोहापोहतत्त्वज्ञाना

10

ष

भिनिवेशा बुद्धौ वर्तमानाः पुरुषेऽध्यारोपित सद्भावाः स हि तत्फलस्य भोक्तेति। दृश्यानां गुणानां सरूपभेदावधार
णार्थमिदमारभ्यते। विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि। तत्राकाशवाय्वग्न्युदकभूमयो भूता
नि। शब्दस्पर्शरूपरसगन्धतन्मात्राणामविशेषाणां विशेषाः। तथा श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि
बुद्धीन्द्रियाणि वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियाणि एकादशं मनः सर्वार्थमित्येतानि अस्मिता
लक्षणस्याविशेषस्य विशेषाः गुणानामेष षोडशको विशेषपरिणामः। षडविशेषाश्च। तद्य
था। शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रञ्चेति एकद्वित्रिचतुष्पञ्चल
क्षणाः शब्दादयः पञ्चाविशेषाः षष्ठश्चाविशेषोऽस्मितामात्र इत्येते सत्तामात्रस्यात्मनो महतः ष
डविशेषपरिणामाः। यत्तत्परमविशेषेभ्यो लिङ्गमात्रं महत्तत्त्वं तस्मिन्नेते सत्तामात्रे मह
त्यात्मन्यवस्थाय विवृद्धिका˅मनुभवन्ति। प्रतिसंसृज्यमानाश्च तस्मिन्नेव सत्तामात्रे
महत्यात्मन्यवस्थाय यत्तन्निःसत्तासत्तं निःसदसद्व्यक्तमलिंगं प्रधानं तत्प्रतियान्तीत्येव तेषां

˅ष्ठा

लिङ्गमात्रपरिणामो बुद्धिः सत्तासत्त्वं वा लिंगपरिणाम इति। अलिङ्गावस्थायां न पुरुषार्थो हेतुः।
नालिंगावस्थायामादौ पुरुषार्थता कारणं भवतीति नास्याः पुरुषार्थता कारणं भवतीति नासौ
पुरुषार्थकृतेति नित्याख्यायते। त्रयाणां त्ववस्थाविशेषाणामादौ पुरुषार्थता कारणं भवति।
स चार्थो हेतुर्निमित्तं कारणं भवतीत्यनित्याख्यायते। गुणास्तु सर्वधर्मानुपातिनो न प्रत्यस्त-
मयन्ते। नोपजायन्ते व्यक्तिभिरेवातीतानागतव्ययागमवतीभिर्गुणान्वयिनीभिरुपजननाऽ-
पायधर्मका इव प्रत्यवभासन्ते। यथा देवदत्तो दरिद्राति कस्माद्यतोऽस्य म्रियन्ते गाव इति
गवामेव मरणात्तस्य दरिद्राणं न स्वरूपहानिरिति समः समाधिः। लिङ्गमात्रमलिङ्गस्य प्रत्या-
सन्नम्। तत्र तत्संसृष्टं विविच्यते। क्रमानतिवृत्तेः। तथा षडविशेषा लिङ्गमात्रे संसृष्टा वि वि-
च्यते परिणामक्रमनियमात् तथा तेष्वविशेषेषु भूतेन्द्रियाणि संसृष्टानि विविच्यन्ते। तथा
चोक्तम्। पुरस्तान्न विशेषेभ्यः परं तत्त्वान्तरमस्तीति नास्ति विशेषाणां तत्त्वान्तरपरिणामस्तेषां

तु धर्मलक्षणावस्थापरिणामा व्याख्यास्यन्ते। व्याख्यातं दृश्यं। अथ द्रष्टुः स्वरूपावधारणार्थ
मिदमारभ्यते। द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ।२०। दृशिमात्र इति दृक्शक्तिरेव विशे
षणापरामृष्टेत्यर्थः। स पुरुषो बुद्धेः प्रतिसंवेदी स बुद्धेर्न स्वरूपो नात्यन्तं विरूप इति। न तावत्स
रूपः कस्माज्ज्ञाताज्ञातविषयत्वात्परिणामिनी हि बुद्धिः तस्याश्च विषयो गवादिर्घटादिर्वा ज्ञात
श्चाज्ञातश्चेति परिणामित्वं दर्शयति। सदाज्ञातविषयत्वं तु पुरुषस्यापरिणामित्वं परिदीप
यति। कस्मान्न हि बुद्धिश्च नाम पुरुषविषया स्याद्गृहीतागृहीता चेति सिद्धं पुरुषस्य सदाज्ञातवि
षयत्वं ततश्चापरिणामित्वमिति। किञ्च परार्था बुद्धिः संहत्यकारित्वात् स्वार्थः पुरुष इति तथा सर्वार्था
ध्यवसायकत्वात् त्रिगुणा बुद्धिस्त्रिगुणत्वादचेतन इति गुणानां तूपद्रष्टा पुरुष इति। अतो न स्व
रूपः। अस्तु तर्हि विरूप इति। नात्यन्तं विरूपः। कस्मात्। शुद्धोऽप्यसौ प्रत्ययानुपश्यो यतः प्रत्ययं बौ
द्धमनुपश्यति। तमनुपश्यन्नतदात्मापि तदात्मक इव प्रत्यवभासते तथा चोक्तम्। अपरिणामिनी हि
भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे संक्रान्तेव तद्वृत्तिमनुपतति। तस्याश्च प्राप्तचै

12

तन्न्योपग्रहरूपा याबुद्धिवृत्ते रनुकारमात्रतया बुद्धिवृत्त्यविशिष्टा हि वृत्तिरिति व्याख्यायते। तदर्थ एव दृश्यस्या
त्मा ।२१। दृशिरूपस्य पुरुषस्य कर्मविषयतामापन्नं दृश्यमिति। तदर्थ एव दृश्यस्यात्मा भवतीत्यर्थः।
स्वरूपं तु पररूपेण प्रतिलब्धात्मकं भोगापवर्गार्थतायां कृतायां पुरुषेण न दृश्यत इति स्वरूपहाना
दस्य नाशः प्राप्तो न तु विनश्यति। कस्मात्। कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ।२२।
कृतार्थमेवैकं पुरुषं प्रति दृश्यं नष्टमपि नाशं प्राप्तमप्यनष्टं तदन्यपुरुषसाधारणत्वात्। कुश
लं पुरुषं प्रति नाशं प्राप्तमप्यकुशलान्पुरुषान्प्रति न कृतार्थमिति तेषां दृशेः कर्मविषयतामापन्नं ल
भत एव पररूपेणात्मरूपमिति। अतश्च दृग्दर्शनशक्त्योर्नित्यत्वात्। अनादिः संयोगो व्याख्यात इति।
तथा चोक्तम्। धर्मिणामनादिसंयोगात्। धर्ममात्राणामप्यनादिः संयोग इति। संयोगस्वरूपाभि
ते धित्सयेदं सूत्रं प्रववृते। स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ।२३। पुरुषः स्वामी दृश्येन स्वेन दर्श
नार्थं संयुक्तः। तस्मात्संयोगाद्दृश्यस्योपलब्धिर्या स भोगः। या तु द्रष्टुः स्वरूपोपलब्धिः सोऽपवर्गो दर्शन
कार्यावसानः संयोग इति। दर्शनं वियोगस्य कारणमुक्तं दर्शनमदर्शनस्य प्रतिद्वन्द्वीति अदर्शनं

संयोगनिमित्तमुक्तं तत्र दर्शनं मोक्षकारणमदर्शनाभावादेव वन्धाभावः स मोक्ष इति। दर्शनस्य भावे
वन्धकारणस्यादर्शनस्य नाश इत्यतो दर्शनं ज्ञानं कैवल्यकारणमुक्तं। किं चेदमदर्शनं नाम किं गुणानाम
धिकारः। आहोस्विद् दृशिरूपस्य स्वामिनो दर्शितविषयस्य प्रधानचित्तस्यानुत्पादः। स्वस्मिन् दृश्ये विद्यमाने यो
दर्शनाभावः। किमर्थवत्ता गुणानां। अथाविद्या स्वचित्तेन सह निरुद्धा स्वचित्तस्योत्पत्तिबीजम्। किं स्थिति
संस्कारक्षये गतिसंस्काराभिव्यक्तिः। यत्रेदमुक्तम्। प्रधानं स्थित्यैव वर्तमानं विकाराकरणादप्रधानं स्यात्।
तथा गत्यैव वर्तमानं विकारनित्यत्वादप्रधानं स्यात्। उभयथा चास्य वृत्तिः प्रधानव्यवहारं लभते नान्यथा।
कारणान्तरेष्वपि कल्पितेष्वेव समानश्चर्चः। दर्शनशक्तिरेवादर्शनमित्येके। प्रधानस्यात्मख्यापनार्था
प्रवृत्तिरिति श्रुतेः। सर्वबोध्यबोधसमर्थः प्राक्प्रवृत्तेः पुरुषो न पश्यति सर्वकार्यकारणसमर्थं दृश्यं तदा
न दृश्यत इति। उभयस्याप्यदर्शनं धर्म इत्येके। तत्रेदं दृश्यस्य स्वात्मभूतमपि पुरुषप्रत्ययापेक्षं तद्दर्श
नं दृश्यधर्मत्वेन भवति। तथा पुरुषस्यानात्मभूतमपि दृश्यप्रत्ययापेक्षं पुरुषधर्मत्वेनेवादर्शनमवभा
सते। दर्शनं ~~ज्ञान~~मेवादर्शनमिति केचिदभिदधति। इत्येते शास्त्रगता विकल्पास्तत्र विकल्पबहुत्वमेतत्।

सर्वपुरुषाणां गुणसंयोगे साधारण विषयं । यस्तु प्रत्यक् चेतनस्य स्वबुद्धिसंयोगः । तस्य हेतुरविद्या ।२४। विपर्य
यज्ञान वासनेत्यर्थः । विपर्ययज्ञान वासनावासिता न कार्यनिष्ठां पुरुषख्यातिं बुद्धिः प्राप्नोति साधिकारा पुन
रावर्तते । मातुः पुरुषख्याति पर्यवासना कार्यनिष्ठां प्राप्नोति चरिताधिकारा निवृत्ता दर्शनबन्ध कारणा
भावान पुनरावर्तते । अत्र कश्चित् षण्ढकोपाख्यानेनोद्घाटयति । मुग्धया भार्यया अभिधीयते । षण्ढक आ
र्यपुत्र अपत्यवती मे भगिनी इति किमर्थं नाहमिति । स तामाह मृतस्तेऽहमुत्पादयिष्यामीति तथेदं वि
द्यमानं ज्ञानं चित्तनिवृत्तिं करोति विनष्टं करिष्यतीति का प्रत्याशा । तत्राचार्यदेशीयो वक्ति । ननु बु
द्धिनिवृत्तिरेव मोक्षो दर्शन कारणाभावात् बुद्धिनिवृत्तिः । तच्चादर्शनं बन्धकारणं दर्शनान्निवर्तते ।
तत्र चित्तनिवृत्तिरेव मोक्षः किमर्थमस्थान एवास्य मतिविभ्रमः । हेयं दुःखं हेयकारणञ्च संयोगा
ख्यं सनिमित्तमुक्तं अतः परं हानं वक्तव्यम् । तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यं ।२५। तस्यादर्शनस्या
भावाद् बुद्धिपुरुष संयोगाभावः । आत्यन्तिको बन्धनोपरम इत्यर्थः । एतद्धानं तद्दृशेः कैवल्यं पुरुषस्यामि
श्रीभावः पुनरसंयोगो गुणैरित्यर्थः । दुःखकारणनिवृत्तौ दुःखोपरमो हानं तदा स्वरूपप्रतिष्ठः पुरुष

इत्युक्तम्। अथ हानस्य कः प्राप्त्युपाय इति। विवेकख्यातिरविप्लवा हानोपायः॥२६॥ सत्वपुरुषान्यताप्र
त्ययो विवेकख्यातिः। सत्वनिवृत्तमिथ्याज्ञाना प्लवते। यदा मिथ्याज्ञानं दग्धबीजभावं वन्ध्यप्रसवं संप
द्यते तदा विधूतक्लेशरजसः सत्वस्य परे वैशारद्ये परस्यां वशीकारसंज्ञायां वर्तमानस्य विवेकप्रत्ययप्रवा
हो निर्मलो भवति सा विवेकख्यातिरविप्लवा हानस्योपायस्ततो मिथ्याज्ञानस्य दग्धबीजभावोपगमः पुनश्चाप्र
सव इत्येष मोक्षस्य मार्गो हानस्योपाय इति। तस्य सप्तधा प्रान्तभूमिः प्रज्ञा॥२७॥ तस्येति प्रत्युदितख्यातेः।
प्रत्यवमायास्सप्तधेति। अशुद्ध्यावरणमलापगमाच्चित्तस्य प्रत्ययान्तरानुत्पादे सति सप्तप्रकारै
व प्रज्ञा विवेकिनो भवति तद्यथा परिज्ञातं हेयं नास्य पुनः परिज्ञेयमस्ति। क्षीणा हेयहेतवो न पुनरे
तेषां क्षेतव्यमस्ति साक्षात्कृतं निरोधसमाधिना हानं भावितो विवेकख्यातिरूपो हानोपाय इत्येषा च
तुष्टयी कार्यविमुक्तिः प्रज्ञायाः चित्तविमुक्तिस्त्रयी। चरिताधिकारा बुद्धिः गुणा गिरिशिखरतटच्युता इव
ग्रावाणो निरवस्थानाः स्वकारणे प्रलयाभिमुखाः सह तेनास्तं गच्छन्ति। न चैषां प्रविलीनानां पुनरस्त्युत्पादः
प्रयोजनाभावादिति। एतस्यामवस्थायां गुणसंबन्धातीतः स्वरूपमात्रज्योतिरमलः केवली पुरुष इत्येतां

समाधिधां प्रान्तभूमिप्रज्ञामनुपश्यन् पुरुषः कुशल इत्याख्यायते। प्रतिप्रसवेऽपि चित्तस्य मुक्तः कुशल इत्येव भव
ति गुणातीतत्वादिति। सिद्धा भवति विवेकख्यातिः हानोपाय इति। न च सिद्धिरन्तरेण साधनमित्येतदारभ्यते। यो
गांगानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः॥२८॥ योगांगान्यष्टावभिधायिष्यमाणानि तेषामनुष्ठा
नात्पञ्चपर्वणो विपर्ययस्याशुद्धिरूपस्य क्षयो नाशः तत्क्षये सम्यग्ज्ञानस्याभिव्यक्तिः यथा यथा च साधना
न्यनुष्ठीयन्ते तथा तथा तनुत्वमशुद्धिरापद्यते यथा यथा च क्षीयते तथा तथा च क्षयक्रमानुरोधिनी ज्ञान
स्यापि दीप्तिर्विवर्धते सा खल्वेषा विवृद्धिः प्रकर्षमनुभवति आविवेकख्यातेः आगुणपुरुषस्वरूपविज्ञाना
दित्यर्थः। योगांगानुष्ठानमशुद्धेर्वियोगकारणं यथा परशुश्छेद्यस्य विवेकख्यातेस्तु प्राप्तिकारणम्। यथा
धर्मः सुखस्य नान्यथा कारणम्। कति चैतानि कारणानि शास्त्रे भवन्ति। नवैवेत्याह। तद्यथा। उत्पत्तिस्थिति
अभिव्यक्तिविकारप्रत्ययाप्तयः। वियोगान्यत्वधृतयः कारणं नवधा स्मृतमिति। तत्रोत्पत्तिकारणं मनो
भवति ज्ञानस्य। स्थितिकारणं मनसः पुरुषार्थता शरीरस्येवाहार इति अभिव्यक्तिकारणं यथा रूपस्यालो
कः। विकारकारणं मनसो विषयान्तरम्। यथाग्निः पाक्यस्य प्रत्ययकारणं धूमज्ञानमग्निज्ञानस्य। प्राप्तिका
रणं योगांगानुष्ठानं विवेकख्यातेः। वियोगकारणं तदेवाशुद्धेः। अन्यत्वकारणम्। यथा सुवर्णस्य सु

वर्णकारः। एवमेकस्य स्त्रीप्रत्ययस्याविद्या मूढत्वे द्वेषो दुःखत्वे रागः सुखत्वे तत्त्वज्ञानं माध्यस्थ्ये धृतिकार
णं शरीरमिन्द्रियाणां तानि च तस्य महाभूतानि शरीराणां तानि च परस्परम्। सर्वेषां तैर्यग्यौनमानुष
दैवतानि च। परस्परार्थत्वादित्येवं नव कारणानि तानि च यथासम्भवं पदार्थान्तरेष्वपि योज्यानि।
योगाङ्गानुष्ठानं तु द्विधैव कारणत्वं लभत इति। तत्र योगाङ्गान्यवधार्यन्ते। यमनियमासनप्राणा
यामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि। यथाक्रममेषामनुष्ठानं स्वरूपं च व्याख्यास्यामः। तत्राहिं
सासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः॥ २९॥ तत्राहिंसा सर्वदा सर्वथा सर्वभूतानामनभिद्रोहः। उत्तरे च
यमनियमास्तन्मूलास्तत्सिद्धिपरतयैव तत्प्रतिपादनाय प्रतिपाद्यन्ते तदवदातरूपकरणायैवोपा
दीयन्ते। तथा चोक्तं स खल्वयं ब्राह्मणो यथा यथा व्रतानि बहूनि समादित्सते तथा तथा प्रमादकृते
भ्यो हिंसानिदानेभ्यो निवर्तमानस्तामेवावदातरूपामहिंसां करोति। सत्यं यथार्थे वाङ्मन
सी। यथा दृष्टं यथानुमितं यथाश्रुतं तथा वाङ्मनश्चेति। परत्र स्वबोधसंक्रान्तये वागुक्ता सा
यदि न वञ्चिता भ्रान्ता वा प्रतिपत्ति ~~वन्धि~~ वन्ध्या वा भवेत्। इत्येषा सर्वभूतोपकारार्थं प्रवृत्ता न

भूतोपघातात्तयैव यद्धिदैव मयापि धीयमाना भूतोपघातायैव स्यान्न सत्यम्। पापमेव भवेत्। तेन पुण्याभा
सेन पुण्यप्रतिरूपकेन कष्टतमं प्राप्नुयात् तस्मात्परीक्ष्य सर्वभूतहितं सत्यं ब्रूयात्। स्तेयमशास्त्रपूर्वकं द्रव्या
णां परतः स्वीकरणं तत्प्रतिषेधः पुनरस्पृहारूपमस्तेयमिति। ब्रह्मचर्यं गुप्तेन्द्रियस्योपस्थस्य संयमः।
विषयाणामर्जनरक्षणक्षयसंगहिंसादोषदर्शनादस्वीकरणमपरिग्रह इत्येते यमाः। ते तु जातिभोग
कालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम्। ३१। तत्राहिंसा जात्यवच्छिन्ना मत्स्यबन्धकस्य मत्स्येष्वे
व नान्यत्र हिंसा देशावच्छिन्ना न तीर्थे हनिष्यामीति। सैव कालावच्छिन्ना न चतुर्दश्यां पुण्येहनीति। सै
व त्रिभिरुपरतस्य समयावच्छिन्ना देवब्राह्मणार्थे नान्यथा हनिष्यामीति। यथा च क्षत्रियाणां युद्ध
एवाहिंसा नान्यत्रेति एभिर्जातिदेशकालसमयैरनवच्छिन्ना अहिंसादयः सर्वथैव परिपालनीयाः।
सर्वभूमिषु सर्वविषयेषु सर्वथैवाविदितव्यभिचाराः सार्वभौमा महाव्रतमित्युच्यते। शौचसन्तोष
तपःस्वाध्यायेश्वरप्रणिधानानि नियमाः। ३२। तत्र शौचं मृज्जलादिजनितं मेध्याभ्यवहरणादि च
बाह्यम्। आभ्यन्तरं चित्तमलानामाक्षालनं सन्तोषः सन्निहितसाधनादधिकस्यानुपादित्सा। तपो द्वन्द्व
सहनं द्वन्द्वं च जिघत्सापिपासे शीतोष्णे स्थानासने काष्ठमौनाकारमौने च व्रतानि चैषां यथायोगं

८ तया

कृच्छ्रचान्द्रायणमायपनादीनि। स्वाध्यायो मोक्षशास्त्राणामध्ययनं प्रणवजपो वा। ईश्वरप्रणिधानं
तस्मिन्परमगुरौ सर्वकर्मार्पणम्। शय्यासनस्थोऽथ पथि व्रजन्वा स्वस्थः परिक्षीणवितर्कजालः।
संसारबीजक्षयमीक्षमाणः स्यान्नित्ययुक्तोऽमृतभोगभागी। यत्रेदमुक्तम्। ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरा
याभावश्चेति। एतेषां यमनियमानां वितर्कबाधने प्रतिपदे भावनम्।३२। यदास्य ब्राह्मणस्य हिंसादयो वि
तर्का जायेरन् हनिष्याम्यहमपकारिणमनृतमपि वक्ष्यामि द्रव्यमप्यस्य स्वीकरिष्यामि दारेषु वास्य
व्यवायी भवामि परिग्रहेषु वा स्य स्वामी भविष्यामि, इति एवमुन्मार्गप्रवणवितर्कज्वरेणातिदीप्तेन ब
बाध्यमानस्तत्प्रतिपक्षान्भावयेत्॥ घोरेषु संसाराङ्गारेषु पच्यमानेन मया शरणमुपागतः सर्वभूताभय
प्रदानेन योगधर्मः। स खल्वहं त्यक्त्वा वितर्कान्पुनस्तानाददानस्तुल्यः श्ववृत्तेनेति भावयेत्। यथा श्वा
वान्तावलेही तथा त्यक्तस्य पुनरादानमित्येवमादि सूत्रान्तरेष्वपि योज्यम्। वितर्का हिंसादयः कृतकारि
तानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपदेभा
वनम्।३३। तत्र हिंसा तावत्कृता कारितानुमोदितेति त्रिधा। एकैका पुनस्त्रिधा लोभेन मांसच

मार्थेन क्रोधेनापकृतमनेनेति मोहेन धर्मो भविष्यतीति। लोभक्रोधमोहाः पुनस्त्रिधा मृदुमध्याधिमात्रा
इति एवं सप्तविंशतिर्भेदा भवन्ति हिंसायाः मृदुमध्याधिमात्राः पुनस्त्रिधा मृदु मृदु मध्य मृदु तीव्रमृदुरि
ति। तथा मृदुमध्यो मध्यमध्यस्तीव्रमध्य इति। तथा मृदुतीव्रो मध्यतीव्रोऽधिमात्रतीव्र इति। एवमेका
शीतिभेदा हिंसा भवति। सा पुनर्नियमविकल्पसमुच्चयभेदादसंख्येया प्राणभृद्भेदस्यापरि
संख्येयत्वादिति। एवमनृतादिष्वपि योज्यम्। ते खल्वमी वितर्का दुःखाज्ञानानन्तफला इति।
प्रतिपक्षभावनं दुःखमज्ञानञ्चानन्तं फलं येषामिति प्रतिपक्षभावनम्। तथा च हिंसकः प्रथमं
तावद्वध्यस्य वीर्यमाक्षिपति ततः शस्त्रादिनिपातेन दुःखयति ततो जीवितादपि मोचयतीति।
ततो वीर्याक्षेपादस्य चेतनाचेतनमुपकरणं क्षीणवीर्यं भवति। दुःखोत्पादान्नरकतिर्यक्प्रेतादिषु दुः
खमनुभवति। जीवितव्यपरोपणात्प्रतिक्षणञ्च जीवितात्यये वर्तमानो मरणमिच्छन्नपि दुःखविपाकस्य
नियतवेदनीयत्वात्। कथंचिदेवोच्छ्वसिति यदि च कथंचित्पुण्यावापगता हिंसा भवेत्। तत्र सुखप्राप्तौ
भवेदल्पायुरिति। एवमनृतादिष्वपि यथासंभवं योज्यम्। एवं वितर्काणाञ्चामुमेवानुगतं विपाकमनिष्टं

भावयन्नावितर्केषु मनः प्रसादयति। तत्प्रतिपक्षभावनाहेतोर्हेया वितर्का यदास्य स्युरप्रसवधर्माणस्तदा तत्कृत
मैश्वर्यं योगिनः सिद्धिसूचकं भवति। तद्यथा। अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः।३४। सर्वप्राणिनां भव
ति। सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्॥३५। धार्मिको भवति इति स्वर्गं प्राप्नुहि इति स्वर्गं प्राप्नोति। अमो
घास्य वाग्भवति। अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्। सर्वदिक्स्थान्यस्योपतिष्ठन्ते रत्नानि। ब्रह्मचर्यप्रति
ष्ठायां वीर्यलाभः।३६। केस्य लाभाद् प्रतिघान्गुणानुत्कर्षयति। सिद्धश्च विनेयेषु ज्ञानमाधातुं समर्थो
भवति। अपरिग्रहस्थैर्ये जन्मकथंताबोधः।३८। अस्य भवति कोहमासं कथमहमासं किंस्विदिदं कथंस्वि
दिदं के वा भविष्यामः कथं वा भविष्याम इत्येवमस्य पूर्वान्तपरान्तमध्येष्वात्मभावजिज्ञासा स्वरूपेणो
पावर्तते। एता यमस्थैर्ये सिद्धयो नियमेषु वक्ष्यामः। शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः। स्वाङ्गजुगुप्सायां शौ
चमारभमाणः कायावद्यदर्शी कायानभिष्वङ्गी यतिर्भवति। किञ्च परैरसंसर्गः कायस्वभावावलोकी स
मविकायं जिहासुर्मृज्जलादिभिराक्षालयन्नपि कायशुद्धिमपश्यन्कथं परकायैरत्यन्तमेवाप्रयतैः संस
ज्येत। किञ्च सत्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च भवन्तीति वाक्यशेषः।४०।
शुचेः सत्वशुद्धिस्ततः सौमनस्यं ततः ऐकाग्र्यं तत इन्द्रियजयस्ततश्चात्मदर्शनयोग्यत्वं बुद्धिसत्वस्य भव

तीति एतच्छौचस्थैर्यादपि गम्यत इति। संतोषादनुत्तमसुखलाभः।४१। तच्चोक्तम्। यच्च कामसुखं लोके
यच्च दिव्यं महत्सुखम्। तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलामिति॥ कायेन्द्रियसिद्धिरशुद्धिक्षया
त्तपसः।४२। निर्वर्त्यमानमेव तपो हिनस्त्यशुद्ध्यावरणमलं तदावरणमलापगमात्कायसिद्धि
रणिमाद्या तथेन्द्रियसिद्धिर्दूराच्छ्रवणदर्शनाद्येति। स्वाध्यायादिष्टदेवतासंप्रयोगः।४३। देवता
ऋषयः सिद्धाश्च स्वाध्यायशीलस्य दर्शनं गच्छन्ति कार्ये चास्य वर्तन्त इति। समाधिसिद्धिरीश्वर
प्रणिधानात्।४४। ईश्वरार्पितसर्वभावस्य समाधिसिद्धिर्यया सर्वमीप्सितमवितथं जानाति
देशान्तरे देहान्तरे कालान्तरे च ततोऽस्य प्रज्ञा यथाभूतं प्रजानातीति।उक्ताः सह सिद्धिभिर्य
मनियमाः। आसनादीनि वक्ष्यामः। तत्र स्थिरसुखमासनम्।४५। तद्यथा पद्मासनं वीरासनं
भद्रासनं स्वस्तिकं दण्डासनं सोपाश्रयं पर्यङ्कः क्रौञ्चनिषदनं हस्तिनिषदनं उष्ट्रनिषदनं
समसंस्थानं स्थिरसुखं यथासुखं चेत्येवमादि। प्रयत्न~~प्रयत्न~~शैथिल्यानन्तसमापत्तिभ्याम्।४६
भवतीति वाक्यशेषः। प्रयत्नोपरमात्सिध्यत्यासनं येन नाङ्गमेजयो भवति। अनन्ते वा समापन्नं

चित्तमासनं निर्वर्तयतीति। ततो द्वन्द्वानभिघातः।४७। शीतोष्णादिभिर्द्वन्द्वैरासनजयान्नाभिभूयते।
तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः।४८॥ सत्यासने बाह्यस्य वायोराचमनं श्वासः।
कौष्ठ्यस्य वायोर्निःसारणं प्रश्वासः। तयोर्गतिविच्छेद उभयाभावः प्राणायामः। स तु। बाह्याभ्य
न्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः।४९। यत्र श्वासपूर्वको गत्यभावः स बाह्यः
यत्र प्रश्वासपूर्वको गत्यभावः स आभ्यन्तरः। तृतीयस्तम्भवृत्तिर्यत्रोभयाभावः सकृत्प्रयत्नाद्भव
ति। यथा तप्ते न्यस्तमुपले जलं सर्वतः संकोचमापद्यते। तथा द्वयोर्युगपद्गत्यभाव इति। त्रयोऽप्ये
ते देशेन परिदृष्टाः। इयानस्य विषयो देश इति। कालेन परिदृष्टाः क्षणानामियत्तावधारणेना
वच्छिन्ना इत्यर्थः। संख्याभिः परिदृष्टा एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातः। तद्वन्निगृहीतस्यैता
वद्भिर्द्वितीय उद्घातः। एवं तृतीयः। एवं मृदुः। एवं मध्यः। एवं तीव्र इति संख्यापरिदृष्टः स खल्वयमेव
मभ्यस्तो दीर्घसूक्ष्मः। बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः।५०। देशकालसंख्याभिर्बाह्यविषयः परिदृष्ट
आक्षिप्तः। तथाभ्यन्तरपरिदृष्टविषय आक्षिप्तः। उभयथा दीर्घसूक्ष्मः। तत्पूर्वको भूमिजयात्क्रमेणोभयो

गत्यभावश्चतुर्थः प्राणायामः। तृतीयस्तद्विषयानालोचितो गत्यभावः सकृदारब्ध एव देशकालसंख्याभिः
परिदृष्टो दीर्घसूक्ष्मः। चतुर्थस्तु श्वासप्रश्वासयोर्विषयावधारणात् क्रमेण भूमिजयादुभयाक्षेपपूर्वको
गत्यभावश्चतुर्थः। प्राणायाम इत्ययं विशेष इति। ततः क्षीयते प्रकाशावरणम्॥५१॥ प्राणाया
मानभ्यस्यतोऽस्य योगिनः क्षीयते विवेकज्ञानावरणीयं कर्म यत्तदाचक्षते महामोहमये
नेन्द्रजालेन प्रकाशशीलं सत्त्वमावृत्य तदेवाकार्ये नियुङ्क्त इति। तदस्य प्रकाशावरणं
कर्म संसारबन्धनं प्राणायामाभ्यासाद्दुर्बलं भवति प्रतिक्षणं च क्षीयते तथा चोक्तं तपो न परं प्रा
णायामात्ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्येति। किञ्च। धारणासु च योग्यता मनसः
॥५२॥ प्राणायामाभ्यासादेव प्रच्छर्दनविधारणाभ्यां वा प्राणस्येति वचनात्। अथ कः
प्रत्याहारः। स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः।
॥५३॥ स्वविषयसम्प्रयोगाभावे चित्तस्वरूपानुकार इवेति। चित्तनिरोधे चित्तव

ण्निरुद्धानीन्द्रियाणि नेतरेन्द्रियजयवदुपायान्तरमपेक्षन्ते। यथा मधुकरराजं उत्प
तन्तं मक्षिकास्तमनूत्पतन्ति निविशमानमनु विविशन्ति। तथेन्द्रियाणि चित्तनिरोधे
निरुद्धानीति एषप्रत्याहारः। ततः परमावश्यतेन्द्रियाणाम्।५३। शब्दादिष्वव्यसनमिन्द्रि
यजय इति केचित्। शक्तिर्व्यसनं व्यस्यत्येनं श्रेयस इति। अविरुद्धा प्रतिपत्तिर्न्याय्या।
शब्दादिसम्प्रयोगः स्वेच्छया इत्यन्ये। रागद्वेषाभावे सुखदुःखशून्यं शब्दादिज्ञा
नमिन्द्रियजय इति केचित्। चित्तैकाग्र्याद् प्रतिपत्तिरेवेति जैगीषव्यः॥
अतः परमा त्वियं वश्यता यच्चित्तनिरोधे निरुद्धानीन्द्रियाणि नेतरेन्द्रियजयवत्प्रय
त्नकृतमुपायान्तरमपेक्षन्ते योगिन इति।५४। इति पातञ्जले साधननिर्देशो नाम
द्वितीयः पादः।२। उक्तानि पञ्च बहिरङ्गानि साधनानि धारणा वक्तव्या। देशब

नि

न्यस्थित्तस्य धारणा।१। नाभिचक्रे हृदयपुण्डरीके मूर्द्धनि ज्योतिषि नासिकाग्रे जिह्वाग्र
इत्येवमादिषु देशेषु बाह्ये वा विषये चित्तस्य वृत्तिमात्रेण बन्धो धारणा। तत्र प्रत्ययैकतानता
ध्यानम्। तस्मिन्देशे ध्येयालम्बनस्य प्रत्ययस्यैकतानता सदृशः प्रवाहः प्रत्ययान्तरेणापरामृष्टो
ध्यानम्।२। तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः। ध्यानमेव ध्येयाकारनिर्भा
सं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात्तदा समाधिरित्यु
च्यते।३। त्रयमेकत्र संयमः। तदेतद्धारणाध्यानसमाधित्रयमेकत्र संयमः। एकविषयाणि
त्रीणि साधनानि संयम इत्युच्यते। तदस्य त्रयस्य तान्त्रिकी परिभाषा संयम इति।४। तज्जया
त्प्रज्ञालोकः। तस्य संयमस्य जयात्समाधिप्रज्ञाया भवत्यालोको यथा यथा
संयमः। स्थिरपदो भवति तथा तथा समाधिप्रज्ञा विशारदी भवति।५। तस्य
भूमिषु विनियोगः। तस्य संयमस्य जितभूमेर्याऽनन्तरा भूमिस्तत्र विनियोगः। नहि अजिताधरभूमिः।

अनन्तरभूमिं विजित्य प्राप्तभूमिषु संयमं लभते न त्वभावाद्यकृतनत्स्यप्रसालोकः जितोनरभूमिकस्य चनाधरभूमि
षुपरिचित्ततानादिषु संयमो कः कस्मात्तदर्थस्यान्यथैवावगतत्वात् भूमेरस्या इयमनन्तराभूमित्यत्र (?)योग एवोपाध्या
यत्कथमेवं ह्युक्तं योगेन योगो ज्ञातव्यो योगो योगात्प्रवर्तते यो प्रमत्तस्तु योगेन स योगे रमते चिरमिति ॥६॥ त्रयमन्त
रङ्गं पूर्वेभ्यः ॥ तदेतद्धारणाध्यानसमाधित्रयमन्तरङ्गं सम्प्रज्ञातस्य समाधेः पूर्वेभ्यो यमादिभ्यः पञ्चभ्यः साधनेभ्य इति ॥७॥ तद
पि वहिरङ्गं निर्बीजस्य ॥ तदप्यन्तरङ्गं साधनत्रयं निर्बीजस्य योगस्य वहिरङ्गं भवति कस्मात्तदभावेभावादिति ॥ अथ निरोध
चित्तस्य गुणेषु चलत्वं गुणवृत्तमिति कीदृशात्तदा चित्तपरिणामः ॥ व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षण
चित्तान्वयी निरोधपरिणामः ॥९॥ व्युत्थानसंस्कारः चित्तधर्मः समका इति प्रत्ययनिरोधेन निरुद्धा निरोधसंस्कारास्तेपि चित्त
धर्मास्तयोरभिभवप्रादुर्भावौ व्युत्थानसंस्कारा हीयन्ते निरोधसंस्कारा आधीयन्ते निरोधक्षणं चित्तमन्वेति तदेकस्य चित्तस्य य
प्रतिक्षणमिदं संस्कारान्यथात्वं निरोधपरिणामस्तदा संस्कारशेषं चित्तमिति निरोधसमाधौ व्याख्यातम् ॥ तस्य प्रशान्तवाहिता संस्कारात् ॥१०॥
निरोधसंस्काराभ्यासपाटवापेक्षा प्रशान्तवाहिता चित्तस्य भवति नत्संस्कारमान्द्ये व्युत्थानधर्मिणा संस्कारेण निरोधधर्मः संस्कारो
भिभूयत इति ॥१०॥ सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः ॥११॥ सर्वार्थता चित्तधर्मः एकाग्रतापि चित्तधर्मः
सर्वार्थतायाः क्षयस्तिरोभाव इत्यर्थः एकाग्रताया उदय आविर्भाव इत्यर्थः तयोर्धर्मित्वेनानुगतं चित्तं तदिदं चित्त

मपायोपजनयोः आत्मीयत्वेन तयोर्धर्मिणोरनुगतं समाधीयते स चित्तस्य समाधिपरिणामः ॥११॥ ततः पुनः शान्तोदितौ तुल्य
प्रत्ययौ चित्तस्यैकाग्रतापरिणामः ॥ समाहितचित्तस्य पूर्वप्रत्ययः शान्त उत्तरस्तत्सदृश उदितः समाधिचित्तमुभयोरनुगतं
पुनस्तथैवाऽऽसमाधिभ्रेषादिति स खल्वयं धर्मिणश्चित्तस्यैकाग्रतापरिणामः ॥१२॥ एतेन भूतेन्द्रियेषु धर्मलक्षणाव
स्थापरिणामा व्याख्याता ॥१३॥ एतेन पूर्वोक्तेन चित्तपरिणामेन धर्मलक्षणावस्थारूपेण भूतेन्द्रियेषु धर्मपरिणामो लक्षणपरिणा
मो वस्थापरिणामश्चोक्तो वेदितव्यः तत्र व्युत्थाननिरोधयोर्धर्मयोरभिभवप्रादुर्भावौ धर्मिणि धर्मपरिणामो लक्षणपरिणाम
श्च निरोधस्त्रिलक्षणस्त्रिभिरध्वभिर्युक्तः स खल्वनागतलक्षणमध्वानं प्रथमं हित्वा धर्मत्वमनतिक्रान्तो वर्तमानं लक्षणं प्रतिपन्नो यत्रास्य
स्वरूपेणाभिव्यक्तिः एषोस्य द्वितीयोध्वा न चातीतानागताभ्यां लक्षणाभ्यां वियुक्तः तथा व्युत्थानं त्रिलक्षणं त्रिभिरध्वभिर्युक्तं वर्तमानं
लक्षणं हित्वा धर्मत्वमनतिक्रान्तमतीतलक्षणं प्रतिपन्नमेषोऽस्य तृतीयोध्वा न चानागतवर्तमानाभ्यां लक्षणाभ्यां वियुक्तं एवं व्यु पुनः
त्थानं संपद्यमानमनागतलक्षणं हित्वा धर्मत्वमनतिक्रान्तं वर्तमानं लक्षणं प्रतिपन्नं यत्रास्य स्वरूपाभिव्यक्तौ सत्यां व्यापारः एषोस्य द्वितीयो
ध्वा न चातीतानागताभ्यां लक्षणाभ्यां वियुक्तमित्येवं पुनर्निरोध एवं पुनर्व्युत्थानमिति तथावस्थापरिणामः इति तत्र निरोधलक्षणेषु
निरोधसंस्कारा बलवन्तो भवन्ति दुर्बला व्युत्थानसंस्कारा इत्येष धर्माणामवस्थापरिणामः तत्र धर्मिणो धर्मैः परिणामो धर्माणां त्र्यध्वनां
लक्षणैः परिणामो लक्षणानामप्यवस्थाभिः परिणाम इत्येवं धर्मलक्षणावस्थापरिणामैः शून्यं न क्षणमपि गुणवृत्तमवतिष्ठते।

चलंचगुणवृत्तंचगुणस्वाभाव्यंतुप्रवृत्तिकारणमुक्तंगुणानामिति एतेनभूतेन्द्रियेषुधर्मधर्मिभेदात्रिविधःपरिणामोवेदित
व्यःपरमार्थतस्त्वेकएकपरिणामोधर्मिस्वरूपमात्रोहि धर्मोधर्मिविक्रियैवैषाधर्मद्वाराप्रपञ्च्यतइतितत्रधर्मस्यधर्मिणोवर्तमान
स्यैवाध्वस्वतीतानागतवर्तमानेषुभावान्यथात्वंभवतिनद्रव्यान्यथात्वंयथासुवर्णभाजनस्यभित्त्वान्यथाक्रियमाणस्यभावान्यथा
त्वंभवतिनसुवर्णान्यथात्वमिति अपरआहधर्मानभ्यधिकोधर्मीपूर्वत्वानतिक्रमात् पूर्वापरावस्थाभेदमनुपतितःकौटस्थ्येनविपरि
वर्तेतयद्यन्वयीस्यादितिअयमदोषःकस्मादेकान्तानभ्युपगमात्तदेतत्त्रैलोक्यंव्यक्तेरपैतिनित्यत्वप्रतिषेधात्अपेतमप्यस्तिविनाशप्र
तिषेधात्संसर्गाच्चास्यसौक्ष्म्यंसौक्ष्म्याच्चानुपलब्धिरिति लक्षणपरिणामोधर्मोऽध्वसुवर्तमानोऽतीतोऽतीतलक्षणयुक्तोऽनागतवर्तमाना
भ्यांलक्षणाभ्यामवियुक्तस्तथानागतोनागतलक्षणयुक्तोवर्तमानातीताभ्यांलक्षणाभ्यामवियुक्तस्तथावर्तमानोवर्तमानलक्षणयुक्तो
नागतातीताभ्यांलक्षणाभ्यामवियुक्तइतियथापुरुषएकस्यांस्त्रियांरक्तोनशेषासुविरक्तोभवतीति अत्रलक्षणपरिणामेसर्वस्यस
र्वलक्षणयोगादध्वसंकरःप्राप्नोतीतिपरैर्दोषआपद्यतइतितस्यपरिहारोधर्माणांधर्मत्वमप्रसाध्यंसतिचधर्मत्वेलक्षणभेदोऽपि
वाच्योनवर्तमानसमयएवास्यधर्मत्वंएवंहिनचित्तंरागधर्मकंस्यात्क्रोधकालेरागस्यासमुदाचारादिति किञ्चत्रयाणांलक्षणानांयु
गपदेकस्यांव्यक्तौनास्तिसम्भवःक्रमेणतुस्वव्यञ्जकाञ्जनस्यभावोभवेदिति उक्तंचरूपातिशयावृत्त्यतिशयाश्चविरुध्यन्तेसामान्यानि
त्वतिशयैःसहवर्तन्तेतस्मादसंकरःयथारागस्यैवक्वचित्समुदाचारइति नतदानीमन्यत्राभावःकिन्तुकेवलंसामान्येनसमन्वागतइति

अस्ति तदा तत्र सभावः तथा लक्षणास्सेति न धर्मी त्र्यध्वा धर्मास्तु त्र्यध्वानस्ते लक्षिता अलक्षिताश्च तत्र लक्षिताः तान्तामवस्थां प्राप्नुवन्तो

अन्यत्वेन प्रतिनिर्दिश्यन्ते अवस्थान्तरतो न द्रव्यान्तरतः यथैका रेखा शतस्थाने शतं दशस्थाने दशैका चैकस्थाने चैकत्वेपि स्त्री माता

चोच्यते दुहिता चेत्यवस्थापरिणामे कौटस्थ्यप्रसंगदोषः कैश्चिदुक्तः कथमध्वनो व्यापारेण व्यवहितत्वात् यदा धर्मः स्वव्यापारं न करो

ति तदा अनागत यदा करोति तदा वर्तमानः यदा कृत्वा निवृत्तस्तदातीत इत्येवं धर्मधर्मिणोर्लक्षणानामवस्थानां च कौटस्थ्यम्

प्राप्नोतीति परैर्दोष उच्यते नासौ दोषः कस्मात् गुणिनित्यत्वेपि गुणानां विमर्दवैचित्र्यात् यथा संस्थानमादिमद्धर्ममात्रं शब्दा

दीनां विनाश्यविनाशिनामेवं लिङ्गमादिमद्धर्ममात्रं सत्वादीनां गुणानां विनाश्यविनाशिनां तस्मिन्विकारसंज्ञा इति तत्रेदमुदाह

रणं मृद्धर्मी पिण्डाकाराद्धर्माद्धर्मान्तरमुपसंपद्यमानो धर्मतः परिणमते घटाकार इति घटाकारोऽनागतं लक्षणं हित्वा वर्तमानं लक्ष

णं प्रतिपद्यत इति लक्षणतः परिणमते घटो नवपुराणतां प्रतिक्षणमनुभवन्नवस्थापरिणामं प्रतिपद्यत इति धर्मिणोऽपि

धर्मान्तरमवस्था धर्मस्यापि लक्षणान्तरमवस्थेति एक एव परिणामो भेदेनोपदर्शित इति एवमपदार्थान्तरेष्वपि योज्यमिति तए

ते ॥ . . . . ॥ अत्रत्यमेकं पत्रन्नष्टम् . . . . ॥

तस्यातिक्रमः कस्मात्पूर्वपरतायां सत्यां समनन्तरत्वं सा तु नास्तीतस्य तस्माद्द्वयोरेव लक्षणयोः क्रमः तथावस्थापरि
णामोपि घटस्याभिनवस्य प्रान्ते पुराणता दृश्यते सा च क्षणपरम्परानुपातिना क्रमेणाभिव्यज्यमाना परां व्यक्तिमापद्यत इ
ति धर्मलक्षणाभ्यां विशिष्टोयं तृतीयः परिणाम इति त एते क्रमा धर्मधर्मिभेदे सति प्रतिलब्धस्वरूपाः धर्मोपि धर्मी भवत्यन्यधर्म
स्वरूपापेक्षयेति यदा तु परमार्थतो धर्मिण्यभेदोपचारस्तद्द्वारेण स एवाभिधीयते धर्मस्तदायमेकत्वेनैव क्रमः प्रत्यवभासते चि
त्तस्य द्वये धर्माः परिदृष्टाश्चापरिदृष्टाश्च तत्र प्रत्ययात्मकाः परिदृष्टा वस्तुमात्रात्मका अपरिदृष्टास्ते च सप्तैव भवन्त्यनुमानेन
प्रापितवस्तुमात्रसद्भावाः निरोधधर्मसंस्काराः परिणामोथ जीवनं चेष्टा शक्तिश्च चित्तस्य धर्मा दर्शनवर्जिता इति अतो यो
गिन उपात्तस्य सर्वसाधनस्य बुभुत्सितार्थप्रतिपत्तये संयमस्य विषय उपक्षिप्यते ।।१५।। परिणामत्रयसंयमादतीतानागत
ज्ञानम् ।।१६।। धर्मलक्षणावस्थेषु संयमाद्योगिनां भवत्यतीतानागतज्ञानं धारणाध्यानसमाधित्रयमेकत्र संयम उक्तस्तेन
परिणामत्रयं साक्षात्क्रियमाणमतीतानागतज्ञानं तेषु सम्पादयति ।। शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्त
त्प्रविभागसंयमात्सर्वभूतरुतज्ञानम् ।।१७।। तत्र वाग्वर्णेष्वेवार्थवती श्रोत्रं च ध्वनिपरिणाममात्रविषयम् पदं पु
र्नादानुसंहारबुद्धिनिर्ग्राह्यमिति वर्णा एकसमयासंभवित्वात्परस्परनिरनुग्रहात्मानस्ते पदमसंस्पृश्यानुप

स्रा

स्या प्या विर्भूतानां त्रितो भवता स्फोट इति प्रत्येकमपरस्वरूपा उत्पन्नो वर्णाः पुनरेकैकः पदात्मा सर्वाभिधानशक्तिप्रचितः सहका
रिवर्णान्तरप्रतियोगित्वाद्वैश्वरूप्यमिवापन्नः पूर्वश्चोत्तरेणोत्तरश्च पूर्वेण विशेषेवस्थापित इत्येवं बहवो वर्णाः क्रमानुरोधिनोर्थस
ङ्केतेनावच्छिन्ना इयन्त एते सर्वाभिधानशक्तिपरिवृता गकारौकारविसर्जनीयाः सास्नादिमन्तमर्थं द्योतयन्तीति तदेतेषामर्
थसंकेतेनावच्छिन्नानामुपसंहृतध्वनिक्रमाणां य एको बुद्धिनिर्भासः तत्पदं वाचकं वाच्यस्य संकेत्यते तदेकं पदमेकबुद्धिविष
यं एकप्रयत्नाक्षिप्तमभागमक्रममवर्णं बौद्धमन्त्यवर्णप्रत्ययव्यापारोपस्थापितं परत्र प्रतिपिपादयिषया वर्णैरेवाभिधीयमा
नैः श्रूयमाणैः श्रोतृभिरनादिवाग्व्यवहारवासनानुविद्धया लोकबुद्ध्या सिद्धवत्संप्रतिपत्त्या प्रतीयते तस्य संकेतः तद्बुद्धितः प्र
विभागः एतावतामेवंजातीयकोनुसंहार एकस्यार्थस्य वाचक इति संकेतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मकः
योयं शब्दः सोयमर्थः योर्थः स शब्द इति एवमितरेतराध्यासरूपः संकेतो भवतीति एवमेते शब्दार्थप्रत्यया इतरेतराध्यासा
त्संकीर्णाः गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानं य एषां प्रविभागज्ञः स सर्ववित् सर्वपदेषु चास्ति वाक्यशक्ति वृक्ष इत्युक्ते ऽस्तीति
गम्यते न सत्तां पदार्थो व्यभिचरतीति तथा न ह्यसाधना क्रियास्तीति तथा पचतीत्युक्ते सर्वकारकाणामाक्षेपो नियमार्थोनुवा
दः कर्तृकर्मकरणानां चैत्राग्नितण्डुलानामिति दृष्टं वाक्यार्थे पदरचनं श्रोत्रियश्छन्दोधीते जीवति प्राणान्धारयतीति तत्र

वाक्ये पदपदार्थाभिव्यक्तिः ततः पदम्प्रविभज्य व्याकरणीयं क्रियावाचकं कारकवाचकं वा अन्यथा भवत्यश्वोऽजाप
य इत्येवमादिषु नामाख्यातसारूप्यादनिर्ज्ञातं कथं क्रियायां कारके वा व्याक्रियेतेति तेषां शब्दार्थप्रत्ययानां प्रविभागः तद्यथा श्वेत
ते प्रासाद इति क्रियार्थः श्वेतः प्रासाद इति कारकार्थः शब्दः क्रियाकारकात्मा तदर्थः प्रत्ययश्च कस्मात्सोयमिसंबन्धादेकाकार एव त्यभि
प्रत्ययः संकेत इति यस्तु श्वेतोऽर्थः स शब्दप्रत्ययोरालम्बनीभूतः स हि स्वाभिरवस्थाभिर्विक्रियमाणो न शब्दसहगतो न बुद्धिसहगतः
एवं शब्द एवम्प्रत्ययो नेतरेतरसहगत इति अन्यथा शब्दोऽन्यथार्थोऽन्यथा प्रत्यय इति एवं तत्प्रविभागसंयमाद्योगिनः सर्वभूत
रुतज्ञानं संपद्यत इति १७ संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम् ॥१८॥ द्वये खल्वमी संस्काराः स्मृतिक्लेशहेतवो वासना
रूपा विपाकहेतवो धर्माधर्मरूपास्ते पूर्वभवाभिसंस्कृताः परिणामचेष्टानिरोधशक्तिजीवनधर्मवदपरिदृष्टाश्चित्तधर्मा
स्तेषु संयमः संस्कारसाक्षात्क्रियायै समर्थः न च देशकालनिमित्तानुभवैर्विना तेषामस्ति साक्षात्करणं तदित्थं संस्का
ज्ञा रसाक्षात्करणात्पूर्वजातिज्ञानमुत्पद्यते योगिनः परत्राप्येवमेव संस्कारसाक्षात्करणात्परजातिज्ञानम् अत्रेदमा
ख्यानं श्रूयते भगवतो जैगीषव्यस्य संस्कारसाक्षात्करणाद्दशसु महासर्गेषु जन्मपरिणामक्रममनुपश्यतो विवेकजं ज्ञानं

प्रादुरभवत् अथ भगवानावट्यस्तनुधरस्तमुवाच दशसु महासर्गेषु भव्यत्वादनभिभूतबुद्धिसत्वेन त्वया नरकतिर्यग्गर्भसम्भ
वं दुःखं संपश्यता देवमनुष्येषु पुनः पुनरुत्पद्यमानेन सुखदुःखयोः किमधिकमुपलब्धमिति भगवन्तमावट्यं जैगीषव्य उवा
च दशसु महासर्गेषु भव्यत्वादनभिभूतबुद्धिसत्वेन मया नरकतिर्यग्भवं दुःखं संपश्यता देवमनुष्येषु पुनः पुनरुत्पद्यमा
नेन यत्किंचिदनुभूतं तत्सर्वं दुःखमेव प्रत्यवैमि भगवानावट्य उवाच यदिदमायुष्मतः प्रधानवशित्वमनुत्तमं च संतोष
सुखं किमिदमपि दुःखपक्षे निक्षिप्तमिति भगवाञ्जैगीषव्य उवाच विषयसुखापेक्षयैवेदमनुत्तमं संतोषसुखमुक्तं कैवल्या
पेक्षया दुःखमेव बुद्धिसत्वस्यायं धर्मस्त्रिगुणः त्रिगुणश्च प्रत्ययो हेयपक्षे न्यस्त इति दुःखस्वरूपस्तृष्णातन्तुस्तृष्णादुःखसंतापापग
मात्तु प्रसन्नमबाधं सर्वानुकूलं सुखमिदमुक्तमिति ॥१८॥ प्रत्ययस्य परचित्तज्ञानम् ॥१९॥ प्रत्यये संयमात्प्रत्ययस्य साक्षात्करणा
त्ततः परचित्तज्ञानम् ॥१९॥ न च तत्सालम्बनं तस्याविषयीभूतत्वात् ॥२०॥ रक्तं प्रत्ययं जानात्यमुष्मिन्नालम्बने रक्तमिति न जा
नाति परप्रत्ययस्य यदालम्बनं तद्योगिचित्तेन नालम्बनीकृतं परप्रत्ययमात्रं तु योगिचित्तस्यालम्बनीभूतमिति ॥२०॥
कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंप्रयोगेऽन्तर्धानम् ॥२१॥ कायरूपे संयमाद्रूपस्य या ग्राह्या शक्तिस्तां प्रतिब
ध्नाति ग्राह्यशक्तिस्तम्भे सति चक्षुःप्रकाशासंप्रयोगेऽन्तर्धानमुत्पद्यते योगिनः एतेन शब्दाद्यन्तर्धानमुक्तं वेदितव्यम् ॥२
सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा ॥२२॥ आयुर्विपाकं कर्म द्विविधं सोपक्रमं निरुपक्रमं च

यु

तत्र यथार्द्रवस्त्रं वितानितं लघीयसा कालेन शुष्येत् तथा सोपक्रमं यथा च तदेव संपिण्डितं चिरेण संशुष्येत् एवं निरुपक्रमं यथा चा
चाग्निः शुष्के कक्षे मुक्तो वातेन समन्ततो युक्तः क्षेपीयसा कालेन दहेत् तथा सोपक्रमं यथा वा स एवाग्निस्तृणराशौ क्रमशोऽवयवे
षु न्यस्तश्चिरेण दहेत् तथा निरुपक्रमं तदेकभविकमायुष्करं कर्म द्विविधं सोपक्रमं निरुपक्रमं च तत्संयमादपरान्तस्य प्रायणस्य ज्ञानं
अरिष्टेभ्यो वेति त्रिविधमरिष्टमाध्यात्मिकं आधिभौतिकमाधिदैविकं चेति तत्राध्यात्मिकं घोषं स्वदेहे पिहितकर्णो
न शृणोति ज्योतिर्वा नेत्रेऽवष्टब्धे न पश्यति तथाधिभौतिकं यमपुरुषान्पश्यति पितॄनतीतानकस्मादिति आधिदैविकं
स्वर्गमकस्मात्सिद्धान्वा पश्यति विपरीतं वा सर्वमिति अनेन वा जानात्यपरान्तमुपस्थितमिति ॥२२॥ मैत्र्यादिषु बलानि ॥ मैत्री करुणा
मुदितेति तिस्रो भावनास्तत्र भूतेषु सुखितेषु मैत्रीं भावयित्वा मैत्रीबलं लभते दुःखितेषु करुणां भावयित्वा करुणाबलं ल
भ्यते पुण्यशीलेषु मुदितां भावयित्वा मुदिताबलं लभते भावनातः समाधिर्यः स संयमः ततो बलान्यवन्ध्यवीर्याणि जा
यन्ते पापशीलेषूपेक्षा न तु भावना ततश्च तस्यां नास्ति समाधिरिति अतो न बलमुपेक्षातस्तत्र संयमाभावादिति ॥२३॥
बलेषु हस्तिबलादीनि ॥२४॥ हस्तिबले संयमाद्धस्तिबलो भवति वैनतेयबले संयमाद्वैनतेयबलो भवति वायुबले
संयमाद्वायुबल इत्येवमादि ॥२५॥ प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् ॥ ज्योतिष्मती प्रवृत्ति

पा॰यो॰

२४

कत्तामनसूर्यस्य प आलोकः तं योगी तत्क्षणे व्यवहिते वा विप्रकृष्टे वार्थे विन्यस्य तमर्थमभिगच्छति ।२५। भुवनज्ञानं सूर्ये संयमात् ।२६।
तत्प्रस्तारः सप्त लोकाः तत्रावीचेः प्रभृति मेरुपृष्ठं यावदित्येवं भूर्लोको मेरुपृष्ठादारभ्याध्रुवाद्ग्रहनक्षत्रताराविचित्रोन्तरिक्ष
लोकस्ततः परः स्वर्लोकः पञ्चविधो माहेन्द्रस्तृतीयो लोकः चतुर्थः प्राजापत्यो महर्लोकः त्रिविधो ब्राह्मः तद्यथा जनलोकः
तपोलोकः सत्यलोक इति ब्राह्मस्त्रिभूमिको लोकः प्राजापत्यस्ततो महान् माहेन्द्रश्च स्वरिति दिवि तारा भुवि प्रजा इति संग्र
हश्लोकः तत्रावीचेरुपर्युपरि निविष्टाः षण्महानरकभूमयो घनसलिलानलानिलाकाशतमः प्रतिष्ठाः महाकालांबरीषरौरव
महारौरवकालसूत्रान्धतामिस्राः यत्र स्वकर्मोपार्जितदुःखवेदनाः प्राणिनः कष्टमायुर्दीर्घमाक्षिप्य जायन्ते ततो महातलर
सातलातलसुतलवितलतलातलपातालाख्यानि सप्त पातालानि भूमिरियमष्टमी सप्तद्वीपा वसुमती यस्याः सुमेरुर्मध्ये प
र्वतराजः काञ्चनः तस्य राजतवैडूर्यस्फटिकहेममणिमयानि शृङ्गाणि तत्र वैडूर्यप्रभानुरागान्नीलोत्पलपत्रश्यामो नभ
सो दक्षिणो भागः श्वेतः पूर्वः स्वच्छः पश्चिमः कुरुण्डकाभ उत्तरः दक्षिणपार्श्वे चास्य जम्बूः यतोयं जम्बूद्वीपः तस्य सूर्यप्रचारा
द्रात्रिंदिवं लग्नमिव वर्त्तते तस्य नीलश्वेतशृङ्गवन्त उदीचीनास्त्रयः पर्वता द्विसहस्रायामाः तदन्तरेषु त्रीणि वर्षाणि नव नव योजन
सहस्राणि रमणकं हिरण्मयं उत्तराः कुरव इति निषधहेमकूट इति हिमशैला दक्षिणतो द्विसहस्रायामाः तदन्तरेषु त्रीणि

२

वर्षाणि नवनवयोजनसहस्राणि हरिवर्षं किंपुरुषं भारतमिति सुमेरोः प्राचीना भद्राश्वमाल्यवत्सीमानः प्रतीचीनाः केतुमालागन्ध
मादनसीमानो मध्ये वर्षमिलावृतं तदेतद्योजनशतसहस्रं सुमेरोर्दिशि दिशि तदर्द्धेन व्यूढं स खल्वयं शतसहस्रायामो जम्बूद्वीपस्त
तो द्विगुणेन लवणोदधिना वलयाकृतिना वेष्टितः ततश्च द्विगुणा द्विगुणाः शाककुशक्रौञ्चशाल्मलगोमेधपुष्करद्वीपाः
सप्त समुद्राश्च सर्षपराशिकल्पाः सविचित्रशैलावतंसा इक्षुरससुरासर्पिर्दधिमण्डक्षीरस्वादूदकसमुद्रवेष्टिताः वल
याकृतयो लोकालोकपर्वतपरिवाराः पञ्चाशद्योजनकोटिपरिसंख्यातास्तदेतत्सर्वं सुप्रतिष्ठितसंस्थानमण्डलमध्ये
व्यूढं अण्डञ्च प्रधानस्याणुरवयवो यथाकाशे खद्योत इति तत्र पातालजलधौ पर्वतेष्वेतेषु देवनिकाया असुर
गंधर्वकिन्नरकिंपुरुषयक्षराक्षसभूतप्रेतपिशाचापस्मारकाप्सरोब्रह्मराक्षसकूष्माण्डविनायकाः प्रतिवसन्ति सर्वेषु द्वी
पेषु पुण्यात्मानो देवमनुष्याः सुमेरुस्त्रिदशानामुद्यानभूमिस्तत्र मिश्रवनं नन्दनं चैत्ररथं सुमानसमित्युद्यानानि
सुधर्मा देवसभा सुदर्शनं पुरं वैजयन्तः प्रासादः ग्रहनक्षत्रतारकास्तु ध्रुवे निबद्धा वायुविक्षेपनियमेनोपलक्षितप्रचाराः सुमे
रोरुपर्युपरि सन्निविष्टा दिवि परिवर्तन्ते माहेन्द्रनिवासिनः षड्देवनिकायास्त्रिदशा अग्निष्वात्ता याम्यास्तुषिता अपरि
निर्मितवशवर्तिनः परिनिर्मितवशवर्तिनश्चेति सर्वे संकल्पसिद्धा अणिमाद्यैश्वर्योपपन्नाः कल्पायुषो वृन्दारकाः
कामभोगिन औपपादिकदेहा उत्तमानुकूलाभिरप्सरोभिः कृतपरिचाराः महति लोके प्राजापत्ये पञ्चविधो देव
ज४

२५ निकायाः कुमुदा ऋभवः प्रतर्दनाः अञ्जनाभाः प्रचिताभा इत्येते महाभूतवशिनो ध्यानाहाराः कल्पसहस्रायुषः प्रथमे ब्रह्मणो जनलोके
चतुर्विधो देवनिकायो ब्रह्मपुरोहिता ब्रह्मकायिका ब्रह्ममहाकायिका ।। अवत्यमेकं पञ्चनमम् ।। वशीकृत्य सत्त्वपुरुषान्यताप्रत्ययेन
25 न परिणतं तस्माच्च सत्त्वात्परिणामिनोऽत्यन्तविधर्मा शुद्धोऽन्यश्चितिमात्ररूपः पुरुषस्तयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः पुरु
षस्य दर्शितविषयत्वात्स भोगप्रत्ययः सत्त्वस्य परार्थत्वाद्दृश्यः यस्तु तस्माद्विशिष्टश्चितिमात्ररूपोऽन्यः पौरुषेयः प्रत्ययस्तत्र संय
मात्पुरुषविषयः प्रज्ञा जायते न च पुरुषप्रत्ययेन बुद्धिसत्त्वात्मना पुरुषो दृश्यते पुरुष एव प्रत्ययं स्वात्मावलम्बनं पश्यति तथा ह्युक्तम्
विज्ञातारमरे केन विजानीयादिति ।।३५।। ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते ।।३६।। प्रातिभात्सूक्ष्मव्यवहित
विप्रकृष्टातीतानागतज्ञानं श्रावणाद्दिव्यशब्दश्रवणं वेदनाद्दिव्यस्पर्शाधिगमः आदर्शाद्दिव्यरूपसंवित् आस्वादाद्दिव्यरस
संवित् वार्तातो दिव्यगन्धविज्ञानमित्येतानि नित्यं जायन्ते ।।३६।। ते समाधावुपसर्गा व्युत्थाने सिद्धयः ।।३७।। ते प्रातिभादयः स
माहितचित्तस्योत्पद्यमाना उपसर्गास्तद्दर्शनप्रत्यनीकत्वात् व्युत्थितचित्तस्योत्पद्यमानाः सिद्धयः ।।३७।। बन्धकारणशैथिल्यात्
प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः ।।३८।। लोलीभूतस्य मनसोऽप्रतिष्ठस्य शरीरे कर्माशयवशाद्बन्धः प्रतिष्ठेत्यर्थः
तस्य कर्मणो बन्धकारणस्य शैथिल्यं समाधिबलाद्भवति प्रचारसंवेदनं च चित्तस्य समाधिजमेव कर्मबन्धक्षयात्स्वचित्तस्य
प्रचारसंवेदनाच्च योगी चित्तं स्वशरीरान्निष्कृष्य शरीरान्तरेषु निक्षिपति निक्षिप्तं चित्तं चेन्द्रियाण्यनुपतन्ति यथा मधुकरराजा

नं मक्षिका उत्पतन्तमनूत्पतन्ति निविशमानमनुनिविशन्ते तथेन्द्रियाणि परशरीरविशेचित्तमनुविधीयन्त इति ३८॥ उदानजयाज्जलप
ङ्ककण्टकादिष्वसंग उत्क्रान्तिश्च ॥३९॥ समस्तेन्द्रियवृत्तिर्जीवनप्राणलक्षणा तस्य क्रियाभेदात् पञ्चतयी प्राणो मुखनासिकागतिरा
हृदयवृत्तिः समंनयनात्समानः आनाभिवृत्तिः अपनयनादपानः आपादतलवृत्तिः। उन्नयनादुदान आशिरोवृत्तिः व्यापी व्यान
इति तेषां प्रधानः प्राणः उदानजयाज्जलपङ्ककण्टकादिषु सङ्गः उत्क्रान्तिश्च प्रयाणकाले भवति तां वशित्वेन प्रतिपद्यते ॥३९॥ समा
नजयाज्ज्वलनम् ॥४०॥ जितसमानस्तेजस उपध्मानं कृत्वा ज्वलतीति ४०॥ श्रोत्राकाशयोः संबन्धसंयमाद्दिव्यं श्रोत्रम् ॥४१॥ सर्वश्रो
त्राणामाकाशं प्रतिष्ठा सर्वशब्दानां च यथोक्तम् तुल्यदेशश्रवणानामेकदेशश्रुतित्वं सर्वेषां भवतीति तच्चैतदाकाशस्य लिङ्गम् अ
नावरणं चोक्तं तथामूर्तस्यान्यत्रानावरणदर्शनाद्विभुत्वमपि प्रख्यातमाकाशस्य शब्दग्रहणानुमितं श्रोत्रं बधिराबधिरयोरेकः श
ब्दं गृह्णाति अपरो न गृह्णातीति तस्माच्छ्रोत्रमेव शब्दविषयं श्रोत्राकाशयोः सम्बन्धे कृतसंयमस्य योगिनो दिव्यं श्रोत्रं प्रवर्त्तते ॥४१॥
कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम् ॥४२॥ यत्र कायस्तत्राकाशं तस्यावकाशदानात्
कायस्य तेन सम्बन्धः प्राप्तिस्तत्र कृतसंयमो जित्वा तत्सम्बन्धं लघुषु तूलादिष्वापरमाणुभ्यः समापत्तिं लब्ध्वा जितसं
बन्धो लघुर्लघुत्वात् जले पादाभ्यां विहरति ततस्तूर्णनाभितन्तुमात्रे विहृत्य रश्मिषु विहरति ततो यथेष्टमा
काशगतिरस्य भवतीति ४२॥ बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ॥४३॥ शरीराद्बहिर्मनसो व

पा॰यो॰

२६

76

त्तिता भो विदेहा नाम धारणा तां साधयति शरीरप्रतिष्ठस्य मनसो बहिर्वृत्तिमात्रेण भवति सा कल्पितेत्युच्यते या तु शरीरनिरपेक्षा बहिर्भू
तस्यैव मनसो बहिर्वृत्तिः सा खल्वकल्पिता तत्र कल्पितया साधयत्यकल्पितां महाविदेहामिति यया परशरीराण्याविशन्ति यो
गिनः ततश्च धारणातः प्रकाशात्मनो बुद्धिसत्त्वस्य यदावरणं क्लेशकर्मविपाकत्रयं रजस्तमोमूलं तस्य च क्षयो भवति ॥ ४३ ॥
स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः ॥ ४४ ॥ तत्र पार्थिवाद्याः शब्दादयो विशेषाः सहाकारादिभिर्धर्मैः स्थूलशब्दे
न परिभाषिताः एतद्भूतानां प्रथमं रूपं द्वितीयं रूपं स्वसामान्यं मूर्तिर्भूमिः स्नेहो जलं वह्निरुष्णता वायुः प्रणामी सर्वतो गतिराकाश इत्येतत्स्वरूपशब्दे
नोच्यते अस्य सामान्यस्य शब्दादयो विशेषाः तथा चोक्तम् एकजातिसमन्वितानामेषां धर्ममात्रव्यावृत्तिरिति सामान्यविशेष
समुदायोऽत्र द्रव्यं द्विष्ठो हि समूहः प्रत्यस्तमितभेदावयवानुगतः शरीरं वृक्षो यूथं वनमिति शब्देनोपात्तभेदावयवानुगतः समूहः उभये देवम
नुष्याः समूहस्य देवा एको भागो मनुष्या द्वितीयो भागस्ताभ्यामेवाभिधीयते समूहः स च भेदाभेदविवक्षितः आम्राणां वनं ब्रा
ह्मणानां संघः आम्रवणं ब्राह्मणसंघ इति स पुनर्द्विविधो युतसिद्धावयवोऽयुतसिद्धावयवश्च युतसिद्धावयवः समूहो
वनं संघ इति अयुतसिद्धावयवः संघातः शरीरं वृक्षः परमाणुरिति अयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिति पतञ्जलिः ए
तत्स्वरूपमित्युक्तं अथ किमेषां सूक्ष्मरूपं तन्मात्रं भूतकारणं तस्यैकोऽवयवः परमाणुः सामान्यविशेषात्मा अवयवभेदानुगतः स
दाय इत्येवं सर्वतन्मात्राणि सत्क्वाणि एतत्तृतीयं अथ भूतानां चतुर्थरूपं ख्यातिक्रियास्थितिशीला गुणाः कार्यस्वभावा

प व

मुषाति नोन्वयप्राद्वे नोक्तः अथैषां पञ्चरूपमर्थवत्वं भोगापवर्गार्थता गुणेष्वन्वयिनी गुणास्तन्मात्रं भूतभौतिकेष्विति सर्वमर्थवत्
तेष्विदानीं भूतेषु पञ्चसु पञ्चरूपेषु संयमात्तस्य तस्य रूपस्य स्वरूपदर्शनं जयश्च प्रादुर्भवति तत्र पञ्चभूतस्वरूपाणि जित्वा भूतजयी भव
ति तज्जयाद्वत्सानुसारिण्य इव गावोस्य संकल्पानुविधायिन्यो भूतप्रकृतयो भवन्ति॥ ४४॥ **ततोणिमादिप्रादुर्भावः कायसम्पत्तद्ध**
र्मानभिघातश्च॥ ४५॥ तत्राणिमा भवत्यणुः लघिमा लघुर्भवति महिमा महान्भवति प्राप्तिरङ्गुल्यग्रेणापि स्पृशति चन्द्रमसं
प्राकाम्यमिच्छानभिघातः भूमावुन्मज्जति निमज्जति यथोदके वशित्वं भूतभौतिकेषु वशी भवति अवश्यश्चान्येषां ईशित्वं ते
षां प्रभवाप्ययव्यूहानामीष्टे यत्रकामावसायित्वं सत्यसंकल्पता यथा संकल्पस्तथा भूतप्रकृतीनामवस्थानं न च शक्तोपि प
दार्थविपर्यासं करोति कस्मादन्यस्य यत्रकामावसायिनः पूर्वसिद्धस्य तथा भूतेषु संकल्पादिति एतान्यष्टावैश्वर्याणि
कायसंपद्वक्ष्यमाणा तद्धर्मानभिघातश्च पृथ्वी मूर्त्या न निरुणद्धि योगिनः शरीरादिक्रियां शिलामप्यनुविशतीति नापः स्निग्धाः
क्लेदयन्ती नाग्निरुष्णो दहति न वायुः प्रणामी वहति अनावरणात्मकेप्याकाशे भवत्यावृतकायः सिद्धानामप्यदृश्यो
भवति॥ **रूपलावण्यबलवज्रसंहननत्वानि कायसम्पत्॥** ४६॥ दर्शनीयः कान्तिमानतिशयबलः वज्रसंहननश्चेति॥
ग्रहणस्वरूपास्मितान्वयार्थवत्वसंयमादिन्द्रियजयः॥ ४७॥ सामान्यविशेषात्मा शब्दादिर्ग्राह्यस्तेष्विन्द्रियाणां
वृत्तिर्ग्रहणं न च तत्सामान्यमात्रग्रहणाकारं कथमनालोचितः स विषयविशेष इन्द्रियेण मनसानुव्यवसीयेतेति

२७ स्वरूपं गुणात्प्रकाशात्मनो बुद्धिसत्त्वस्य सामान्यविशेषयोरयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिन्द्रियं ते बात् तीयं
रूपं अस्मितालक्षणोऽहंकारः तस्य सामान्यस्येन्द्रियाणि विशेषाः चतुर्थरूपं व्यवसायात्मकाः प्रकाशक्रियास्थितिशीला गु
२८ णाः एषामिन्द्रियाणि सांहंकाराणि परिणामः पञ्चमं रूपं गुणेषु यदनुगतं पुरुषार्थवत्त्वमिति पञ्चस्वेतेषु इन्द्रियरूपेषु यथा
क्रमं संयमः तत्र तत्र जयं कृत्वा पंचरूपजयादिन्द्रियजयः प्रादुर्भवति योगिनः ॥४७॥ ततो मनोजवित्वं विकरणभावः प्रधान
जयश्च ॥४८॥ कायस्यानुत्तमो गतिलाभो मनोजवित्वं विदेहानामिन्द्रियाणामभिप्रेतकालदेशविषयापेक्षो वृत्तिलाभो
विकरणभावः सर्वप्रकृतिविकारवशित्वं प्रधानजयः एतास्तिस्रः सिद्धयो मधुप्रतीका उच्यन्ते एताश्च करणपंचकरूप
जयादधिगम्यन्ते ॥४८॥ सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च ॥४९॥ निर्धूतरजस्तमोमलस्य बु
द्धिसत्त्वस्य परे वैशारद्ये परस्यां वशीकारसंज्ञायां वर्तमानस्य सत्त्वपुरुषान्यताख्यातिमात्ररूपप्रतिष्ठस्य सर्वभावाधिष्ठातृत्वं सर्वात्मनो पा ८
गुणानां व्यवसायव्यवसेयात्मकानां स्वामिवदाक्रमणं प्रत्यशेषदृश्यात्मत्वेनोपस्थितानामित्यर्थः सर्वज्ञातृत्वं सर्वात्मनां गुणानां शान्तो
दिताव्यपदेश्यधर्मित्वेन व्यवस्थितानामक्रमोपारूढं विवेकजं ज्ञानमित्यर्थः इत्येषा विशोका नाम सिद्धिः यां प्राप्य यो
गी सर्वज्ञः क्षीणक्लेशबन्धनो वशी विहरति ॥४९॥ तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ॥५०॥ यदास्यैवं भवति क्लेशकर्म
क्षये सत्त्वस्यायं विवेकप्रत्ययो धर्मः सत्त्वं च हेयपक्षे न्यस्तं पुरुषश्चापरिणामी शुद्धोऽन्यः सत्त्वादित्येवमस्य ततो विरज्य

मानसस्य यावत्क्लेशबीजानि दग्धशालीबीजकल्पान्यप्रसवसमर्थानि मनसा सह प्रत्यस्तं गच्छन्ति तेषु प्रलीनेषु पुरुषः पुनरिदं तापत्रयेण
युंक्ते तदेषां गुणानां मनसि कर्मक्लेशविपाकस्वरूपेणाभिव्यक्तानां चरितार्थानामप्रतिप्रसवे पुरुषस्यात्यन्तिको गुणवियोगः
कैवल्यं तदा स्वरूपप्रतिष्ठा चितिशक्तिरेव पुरुष इति ॥५०॥ स्थान्युपनिमंत्रणे संगस्मयाकरणं पुनरनिष्टप्रसंगात् ॥५१॥ चत्वा
रः खल्वमी योगिनः प्राथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रान्तभावनीयश्चेति तत्राभ्यासी प्रवृत्तमात्रज्योतिः प्रथमः ऋतं
भरप्रज्ञो द्वितीयः भूतेन्द्रियजयी तृतीयः सर्वेषु भावितेषु भावनीयेषु कृतरक्षाबन्धः कृतकर्तव्यसाधनादिमां श्चतुर्थो यस्त्वतिक्रा
न्तभावनीयस्तस्य चित्तप्रतिसर्ग एकोऽर्थः सप्तविधास्य प्रान्तभूमिप्रज्ञाः तत्र मधुमतीं भूमिं साक्षात्कुर्वतो ब्राह्मणस्य स्थानिनो देवाः स
त्वशुद्धिमनुपश्यन्तः स्थानैरुपनिमन्त्रयन्ते भो इहास्यतां इह रम्यतां कमनीयोऽयं भोगः कमनीयेयं कन्या रसायनमिदं जरामृत्युं बाधते
वैहायसमिदं यानममी कल्पद्रुमाः पुण्या मन्दाकिनी सिद्धा महर्षय उत्तमा अनुकूला अप्सरसो दिव्ये श्रोत्रचक्षुषी वज्रोपमः कायः स्वगुणैः स
र्वमिदमुपार्जितमायुष्मता प्रतिगृह्यतामिदमक्षयमजरममरस्थानं देवानां प्रियमित्येवमभिधीयमानः सङ्गदोषान्भावयेत् घोरेषु संसा
राङ्गारेषु पच्यमानेन मया जननमरणान्धकारे विपरिवर्तमानेन कथंचिदासादितः क्लेशतिमिरविनाशी योगप्रदीपस्तस्य चैते तृष्णायोनयो
विषयवायवः प्रतिपक्षाः स खल्वहं लब्धालोकः कथमनया विषयमृगतृष्णया वञ्चितस्तस्यैव पुनः प्रदीपस्य संसाराग्नेरात्मानमिन्धनी
कुर्यामिति स्वस्ति वः स्वप्नोपमेभ्यः कृपणजनप्रार्थनीयेभ्यो विषयेभ्य इत्येवं निश्चितमतिः समाधिं भावयेत् सङ्गमकृत्वा स्मयमपि न कुर्यात्

एवमहं देवानामपि प्रार्थनीय इति स्मयात् यं सुस्थितंमन्यतया मृत्युना केशेषु गृहीतमिवात्मानं न भावयिष्यति तथा चास्य छि
द्रान्तरप्रेक्षी नित्यं यत्नोपचर्यः प्रमादो लब्धविवरः क्लेशानुत्तम्भयिष्यति ततश्च पुनरनिष्टप्रसङ्गः एवमस्य सङ्गस्मयावकुर्व
तो भावितोऽर्थो दृढीभविष्यति भावनीयश्चार्थोऽभिमुखीभविष्यतीति ॥५१॥ क्षणतत्क्रमयोः संवन्धसंयमाद्विवेकजंज्ञानं ॥५२
यथापकर्षपर्यन्तं द्रव्यं परमाणुरेवं परमापकर्षपर्यन्तः कालः क्षणः यावता वा समयेन चलितः परमाणुः पूर्वदेशंसवाइति हि जह्यादु
त्तरदेशमुपसम्पद्येत स कालः क्षणः तत्प्रवाहाविच्छेदस्तु क्रमः क्षणतत्क्रमयोर्नास्ति वस्तुसमाहारः । बुद्धिसमाहारो मुहूर्त्ताहोरात्रा
दयः स खल्वयं कालो वस्तुशून्योऽपि बुद्धिनिर्माणः शब्दज्ञानानुपाती लौकिकानां व्युत्थितदर्शनानां वस्तुस्वरूप इवावभासते क्षणस्तु व
स्तुपतितः क्रमावलम्बी क्रमश्च क्षणानन्तर्यात्मा तं कालविदः काल इत्याचक्षते योगिनः न च द्वौ क्षणौ सह भवतः क्रमश्च न द्वयोः सहभु
वोरसम्भवात् पूर्वस्मादुत्तरस्य भाविनो यदानन्तर्यं क्षणस्य स क्रमः तस्माद्वर्त्तमान एवैकः क्षणो न पूर्वोत्तरक्षणाः सन्तीति तस्मान्नास्ति तत्स
माहारः ये तु भूताभाविनः क्षणास्ते परिणामान्विता व्याख्येयाः तेनैकेन क्षणेन कृत्स्नो लोकः परिणाममनुभवति तत्क्षणोपारूढाः खल्वमी धर्मास्तयोः
क्षणतत्क्रमयोः संयमात्तयोः साक्षात्करणं ततश्च विवेकजं ज्ञानं प्रादुर्भवति तस्य विषयविशेष उपक्षिप्यते ॥ जातिलक्षणदेशैरन्यतानवच्छेदा
त्तुल्ययोः ततः प्रतिपत्तिः ॥५३॥ तुल्ययोर्देशलक्षणसारूप्ये जातिभेदोऽन्यताया हेतुर्गौरियं [illegible] द्वयोरामलकयोर्जातिलक्षणसारूप्याद्देशभेदोऽन्यत्व
करः इदं पूर्वमिदमुत्तरमिति ॥ यदा तु पूर्वमामलकमन्यव्यग्रस्य ज्ञातुरुत्तरदेश उपावर्त्यते तदा तुल्यदेशत्वे पूर्वमेतदुत्तरमेतदिति

*यं वडवेयमिति तुल्यदेशजातीयत्वे लक्षणमन्यत्वकरं कालाक्षी गौः स्वस्तिमती गौ
रिति २

प्रविभागानुपपत्तिः असंदिग्धेन च विवेकज्ञानेन भवितव्यमित्यतदर्थमुक्तम् ततः प्रतिपत्तिर्विवेकज्ञानादिति कथं पूर्वामलकसहवृत्तौ
देश उत्तरामलकसंबन्धात्तद्देशान्निरस्ते चामलके स्वदेशलक्षणानुभवमिति अन्यदेशलक्षणानुभवस्तु तयोरन्यत्वहेतुरिति एते
न दृष्टान्तेन परमाणोस्तुल्यजातिलक्षणदेशस्य पूर्वपरमाणुदेशसहलक्षणसाक्षात्करणादुत्तरस्य परमाणोस्तद्देशानुपपत्तौ उत्तरस्य तत्
देशानुभवो भिन्नः सहलक्षणभेदात्तयोरीश्वरस्यान्यत्वप्रत्ययो भवतीति ॥ अपरे तु वर्णयन्ति येऽन्त्या विशेषास्तेऽन्यताप्रत्ययं कुर्वन्ति
इति तत्रापि देशलक्षणभेदो मूर्तिव्यवधि~~जाति~~जातिभेदश्चान्यत्वहेतुः क्षणभेदस्तु योगिबुद्धिगम्य एवेति अत उक्तम् मूर्तिव्यवधिजा
तिभेदाभावान्नास्ति मूलपृथक्त्वमिति वार्षगण्यः ॥५३॥ तारकं सर्वविषयं सर्वथाविषयमक्रमञ्चेति विवेकजं ज्ञानम् ॥५४॥ तारकमि
ति स्वप्रतिभोत्थमनौपदेशिकमित्यर्थः सर्वविषयं नास्य किंचिद्विषयीभूतमित्यर्थः सर्वथाविषयं सर्वमतीतानागतप्रत्युत्पन्नं स
र्वपर्यायैः सर्वथा जानातीत्यर्थः अक्रममित्येकक्षणोपारूढं सर्वं गृह्णातीत्यर्थः एतद्विवेकजं ज्ञानं परिपूर्णं अस्यैवांशो योगप्रदीपो
मधुमतीं भूमिमुपादाय यावदस्य परिसमाप्तिरिति प्राप्तविवेकजज्ञानस्याप्राप्तविवेकजज्ञानस्य वा ॥५४॥ सत्त्वपुरुषयोः शुद्धि
साम्ये कैवल्यमिति ॥ यदा निर्धूतरजस्तमोमलं बुद्धिसत्त्वं पुरुषस्यान्यताप्रत्ययमात्राधिकारं दग्धक्लेशबीजं भवति ॥ तदा पुरुष
क्ले स्य शुद्धिसारूप्यमिवापन्नं भवति तदा पुरुषस्योपचरितभोगाभावः शुद्धिः एतस्यामवस्थायां कैवल्यं भवति ईश्वरस्यानीश्वरस्य वा वि
वेकजज्ञानभागिनः इतरस्य वा न हि दग्धक्लेशबीजस्य ज्ञाने पुनरपेक्षा काचिदस्ति सत्त्वशुद्धिद्वारेण एतत्समाधिजमैश्वर्यं ज्ञानं
चोपक्रान्तम् ॥

परमार्थतस्तु ज्ञानाद्दृदर्शनं निवर्त्तते तस्मिन्निवृत्ते न संत्युत्तरे क्लेशाः क्लेशाभावात्कर्मविपाकाभावश्चरिताधिकाराश्चैतस्यामवस्थायां
गुणा न पुरुषस्य पुनर्दृश्यत्वेनोपतिष्ठन्ते तत्पुरुषस्य कैवल्यं तदा पुरुषः स्वरूपमात्रज्योतिरमलः केवलो भवति॥ इति पातञ्जलसांख्यप्र
वचने विभूतिपादस्तृतीयः॥ जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः॥१॥ देहान्तरिता जन्मसिद्धिः औषधिभिरसुरभवनेषु रसा
यनेनेत्येवमादि मन्त्रैराकाशगमनाणिमादिः लाभः तपसा संकल्पसिद्धिः कामरूपी यत्र तत्र कामग इत्येवमादि समाधिजाः सिद्धयो व्या
ख्याताः॥ तत्र कायेन्द्रियाणामन्यजातीयपरिणतानां॥१॥ जात्यन्तरपरिणामः प्रकृत्यापूरात्॥२॥ पूर्वपरिणामापाये उत्तरपरिणामो
पजनः तेषामपूरादपूर्वावयवानुप्रवेशाद्भवति कायेन्द्रियप्रकृतयश्च स्वं स्वं विकारमनुगृह्णन्ति आपूरेण धर्मादिनिमित्तमपेक्षमाणा इति॥
निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्॥३॥ न हि धर्मादि निमित्तं तत्प्रयोजकं प्रकृतीनां भवति न कार्येण
कारणं प्रवर्त्त्यत इति कथं तर्हि वरणभेदस्तु ततः क्षेत्रिकवत् यथा क्षेत्रिकः केदारात् केदारान्तरं पिप्लावयिषुः समं निम्नं निम्नतरं वा
नापः पाणिनापकर्षत्यावरणं त्वासां भिनत्ति तस्मिन् भिन्ने स्वयमेवापः केदारान्तरमाप्लावयन्ति तथा धर्मः प्रकृतीनामावरणम
धर्मं भिनत्ति तस्मिन् भिन्ने स्वयमेव प्रकृतयः स्वं स्वं विकारमाप्लावयन्ति यथा वा स एव क्षेत्रिकस्तस्मिन्नेव केदारे न प्रभवत्यौदकान्
भौमान्वा रसान्धान्यमूलान्यनुप्रवेशयितुं किं तर्हि मुद्गगवेधुकश्यामाकादींस्ततोऽपकर्षत्यपकृष्टेषु तेषु स्वयमेव रसा धान्यमूलान्य
नुप्रविशन्ति तथा धर्मो निवृत्तिमात्रे कारणमधर्मस्य शुद्ध्यशुद्ध्योरत्यन्तविरोधात् न तु प्रकृतिप्रवृत्तौ धर्मो हेतुर्भवतीति अत्र नन्दीश्वराद
य उदाहार्याः विपर्ययेणाप्यधर्मो धर्मं बाधते ततश्चाशुद्धिपरिणाम इति तत्रापि नहुषाजगरादय उदाहार्याः यदा तु योगी बहून्कायान्नि

निर्मिमीते तदा किमेकमनस्कास्ते भवन्त्यथानेकमनस्का इति ॥३॥ निर्माणचित्तान्यस्मितामात्रात् ॥४॥ अस्मितामात्रं चित्तकारणमुप
आदाय निर्माणचित्तानि करोति ततः समनसः सचित्तानि भवन्ति ॥४॥ प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम् ॥५॥ बहूनां चित्तानां
कथमेकचित्ताभिप्रायपुरःसरा प्रवृत्तिरिति सर्वचित्तानां प्रयोजकं चित्तमेकं निर्मिमीते ततः प्रवृत्तिभेदः ॥५॥ तत्र ध्यानजमनाशयम् ॥६॥
पञ्चविधं निर्माणचित्तं जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धय इति तत्र यदेव ध्यानजं चित्तं तदेवानाशयं तस्यैव नास्त्याशयो रागादिप्रवृत्ति
र्नातः पुण्यपापाभिसंबन्धः क्षीणक्लेशत्वाद्योगिन इतरेषां तु विद्यते कर्माशयो यतः ॥६॥ कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरे
षाम् ॥७॥ चतुष्पात्खल्वियं कर्मजातिः कृष्णा शुक्लकृष्णा शुक्लाऽशुक्लाकृष्णा चेति तत्र कृष्णा दुरात्मनां शुक्लकृष्णा बहिःसाधनसा
ध्या तत्र परपीडानुग्रहद्वारेण कर्माशयप्रचयः शुक्ला तपःस्वाध्यायध्यानवतां सा हि केवले मनसि आयत्तत्वादबहिःसाधनाधीना न परा
न्पीडयित्वा भवति अशुक्लाऽकृष्णा संन्यासिनां क्षीणक्लेशानां चरमदेहानामिति तत्राशुक्लं योगिन एव संन्यासादकृष्णं चानुपादा
नात् इतरेषां तु भूतानां पूर्वमेव त्रिविधमिति ॥७॥ ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम् ॥८॥ तत इति त्रिविधात्कर्म
णस्तद्विपाकानुगुणानामेवेति यज्जातीयस्य कर्मणो यो विपाकस्तस्यानुगुणा या वासनाः कर्मविपाकमनुशेरते तासामेवाभि
व्यक्तिर्न हि दैवं कर्म विपच्यमानं नारकतिर्यङ्मनुष्यवासनाभिव्यक्तिनिमित्तं भवति किन्तु दैवानुगुणा एवास्य वासना व्यज्यन्ते
नारकतिर्यङ्मनुष्येषु चैवं समानश्चर्चः ॥८॥ जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात् ॥९॥

वृषदंशविपाकोदयः स्वव्यंजकांजनाभिव्यक्तः स यदि जातिशतेन वा दूरदेशतया वा कल्पशतेन वा व्यवहितः स पुनश्च स्वव्यंजकांज
नाभिव्यक्तः। उदेयात् द्रागित्येवं पूर्वाभिभूतवृषदंशविपाकाभिसंस्कृता वासना उपादाय व्यज्येत कस्मात् यतो व्यवहितानामप्यासां स
दृशं कर्माभिव्यंजकं निमित्तीभूतमित्यानन्तर्यमेव कुतश्च स्मृतिसंस्कारयोरेकरूपत्वात् यथानुभवास्तथा संस्काराः ते च कर्मवासना
रूपाः यथा च वासनास्तथा स्मृतिरिति जातिदेशकालव्यवहितेभ्यः संस्कारेभ्यः स्मृतिः स्मृतेश्च पुनः संस्कारा इत्येते स्मृतिसंस्काराः कर्मा
शयवृत्तिलाभवशाद्व्यज्यन्ते अतश्च व्यवहितानामपि निमित्तनैमित्तिकभावानुच्छेदादानन्तर्यमेव सिद्धमिति ॥९॥ तासामनादित्वं चा
शिषो नित्यत्वात् ॥१०॥ तासां वासनानामाशिषो नित्यत्वादनादित्वं येयमात्माशीर्मा न भूवं भूयासमिति सर्वस्य दृश्यते सा न स्वाभा
विकी कस्मात् जातमात्रस्य जन्तोरननुभूतमरणधर्मकस्य द्वेषदुःखानुस्मृतिनिमित्तो मरणत्रासः कथं भवेत् न च स्वा
भाविकं वस्तु निमित्तमुपादत्ते तस्मादनादिवासनानुविद्धमिदं चित्तं निमित्तवशात्काश्चिदेव वासनाः प्रतिलभ्य पुरुषस्य भोगायोपावर्तत
इति घटप्रासादप्रदीपकल्पं संकोचविकासि चित्तं शरीरपरिमाणाकारमात्रमित्यपरे प्रतिपन्नास्तथा चान्तराभावः संसारश्च युक्त एवा
वृत्तिरेवास्य विभुनः संकोचविकासिनीत्याचार्यः तच्च धर्मादिनिमित्तापेक्षं निमित्तं च द्विविधं बाह्यमाध्यात्मिकञ्च शरीरादिसाध
नापेक्षं बाह्यं स्तुतिदानाभिवादनादि चित्तमात्राधीनं श्रद्धाद्याध्यात्मिकं तथा चोक्तं ये चैते मैत्र्यादयो ध्यायिनां विहारास्ते बाह्य
साधननिरनुग्रहात्मानः प्रकृष्टं धर्ममभिनिर्वर्तयन्ति तयोर्मानसं बलीयः कथं ज्ञानवैराग्ये केनातिशय्येते दण्डकारण्यं चित्त

वा[?]लव्यतिरेके रागः शारीरेण कर्मणा परन्यं कर्तुमुत्सहे न तत्समुद्रमगस्त्यवत्पिबेन ॥११ हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषा
मभावे तदभावः ॥२२॥ हेतुर्धर्मात्सुखमधर्मात्दुःखं सुखाद्रागो दुःखात्द्वेषस्ततश्च प्रयत्नस्तेन मनसा वाचा कायेन वा परिस्पन्दमा
नः परमनुगृह्णाति उपहन्ति वा ततः पुनर्धर्माधर्मौ सुखदुःखे रागद्वेषाविति प्रवृत्तमिदं षडरं संसारचक्रमस्य
च प्रतिक्षणमावर्त्तमानस्याविद्या नेत्री मूलं सर्वक्लेशानामित्येष हेतुः फलन्तु यमाश्रित्य यस्य प्रत्युत्प
न्नता धर्मादेः नह्यपूर्वोपजननं मनस्तु साधिकारमाश्रयो वासनानां न ह्यवसिताधिकारे मनसि नि
राश्रया वासनाः स्थातुमुत्सहन्ते यदभिमुखीभूतं वस्तु यां वासनां व्यनक्ति तस्य तदालम्बनमेवं
हेतुफलाश्रयालम्बनैरेतैः संगृहीताः सर्वा वासना एषामभावे तत्संश्रयाणामपि वासनानामभा
वः नास्ति मतः संभवो न चास्ति संभवो विनाश इति द्रव्यत्वेन न संभवंत्यः कथं निवर्तिष्यन्ते वासना
इति ॥१२॥ अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम् ॥१३॥ भविष्यद्व्यक्तिकमनागतं अनु
भूतव्यक्तिकमतीतं स्वव्यापारोपारूढं वर्तमानं त्रयं चैतद्वस्तु ज्ञानस्य ज्ञेयम् यदि चैतत्स्वरूपतो
नाभविष्यन्नेदं निर्विषयं ज्ञानमुदपत्स्यत तस्मादतीतानागतं स्वरूपतोऽस्तीति किंच
भोगभागीयस्य वापवर्गभागीयस्य वा कर्मणः फलमुत्पित्सु यदि निरूपाख्यमिति तदुद्देशे

तेन निमित्तेन न कुशलानुष्ठानेन युज्येत सतश्च फलस्य निमित्तं वर्तमानीकरणे समर्थं नापूर्वोपजनने सिद्धं
निमित्तं नैमित्तकस्य विशेषानुग्रहणम् कुरुते नापूर्वमुत्पादयति धर्मी चानेकधर्मस्वभावस्तस्य चा
ध्वभेदेन धर्माः प्रत्यवस्थिताः न च यथा वर्तमानं व्यक्तिविशेषापन्नं द्रव्यतोस्त्येवमतीतमनागतं च कथं

तर्हि स्वेनैव व्यंग्येन स्वरूपेणानागतमस्ति स्वेन चानुभूतव्यक्तिकेन स्वरूपेणातीतमिति वर्तमानस्यैवा
ध्वनः स्वरूपव्यक्तिरिति न सा भवत्यतीतानागतयोरध्वनोरेकस्य चाध्वनः समये द्वावध्वानौ धर्मिसमन्वा
गतौ भवत एवेति नाभूत्वा भावस्त्रयाणामध्वानामिति ॥१३॥ ते व्यक्तसूक्ष्मा गुणात्मानः ॥१४ ते खल्व
मी त्र्यध्वानो धर्मा वर्तमाना व्यक्तात्मानो तीतानागताः सूक्ष्मात्मानः षडविशेषरूपाः सर्वमिदं गुणानां
सन्निवेशविशेषमात्रमिति परमार्थतो गुणात्मानः तथा च शास्त्रानुशासनं गुणानां परमं रूपं न दृष्टि
पथमृच्छति यत्तु दृष्टिपथं प्राप्तं तन्मायेव सुतुच्छकमिति यदा तु सर्वे गुणाः कथमेकः शब्द एकमिन्द्रि
यमिति ॥ परिणामैकत्वाद्वस्तुतत्त्वम् ॥१५॥ प्रख्याक्रियास्थितिशीलानां गुणानां ग्रहणात्म
कानां करणभावेनैकः परिणामः श्रोत्रमिन्द्रियं ग्राह्यात्मकानां शब्दभावेनैकः परिणामः श
ब्दो विषय इति शब्दादीनां मूर्तिसमानजातीयानामेकः परिणामः पृथिवीपरमाणुस्तन्मात्रा

वयवस्तेषां चैकः परिणामः पृथ्वी गौर्वृक्षः पर्वत इत्येवमादिर्… तां न रेषु पिस्नेहो स्यप्रणाम त्वोकाशादानानुपादाय सामान्यमेक
विकारारम्भः समाधेयः नास्त्यर्थो विज्ञानविसहचरो स्तिुज्ञानमर्थविसहचरं स्वप्नादौ कल्पितमित्यनया दिशा येवस्तुस्व
रूपमपह्नुवते ज्ञानपरिकल्पनामात्रं वस्तु स्वप्नविषयोपमं न परमार्थतोऽस्तीति य आहुः ते न थो ति प्रत्युपस्थितमिदं स्व
स्वमहात्म्येन अत्रत्यमेकं पत्रं न दृष्टम् ॥ निर्विषयान्यायस्य प्रतिसंधधातिरूत्युक्ता न त एव पुनस्तस्यानि तथा स्वन्धानां माहात्म्यनिर्वेदाय विरागा
यानुत्पादाय प्रशान्तये गुरोरन्तिके ब्रह्मचर्यं चरिष्यामीत्युक्त्वा सत्त्वस्य पुनः सत्त्वमेवापह्नुवते सर्वथ्यायोगादयास्तु प्रवादः स्वबु
देनप्रकृ सैवस्वामिनं चित्तस्य भोक्तारमुपयन्ति ॥२१॥ कथं चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम् ॥२२॥ अप
रिणामिनी हि भोक्तृशक्तिः प्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्वृत्तिमनुपतति तस्याश्च प्राप्तचैतन्योपग्रहस्वरूपा
या बुद्धिवृत्तेरनुकारिमात्रतया बुद्धिवृत्त्यविशिष्टा हि ज्ञानवृत्तिराख्यायते तथा चोक्तं न पातालं न च विवरं गिरीणां नैवान्ध
कारं कुक्षयो नोदधीनां गुहा यस्यां निहितं ब्रह्म शाश्वतं बुद्धिवृत्तिमविशिष्टां कवयो वेदयन्ते इति अत श्चैतदभ्युपगम्यते ॥२२॥
द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम् ॥२३॥ मनो हि मन्तव्येनार्थेनोपरक्तं तत्स्वयं च विषयत्वाद्विषयिणा पुरुषेनात्मीयया वृत्त्या
भिसंबद्धं तदेतच्चित्तमेव द्रष्टृदृश्योपरक्तं विषयविषयिनिर्भासं चेतनाचेतनस्वरूपापन्नं विषयात्मकमप्यविषयात्मकमिवा
चेतनं चेतनमिव स्फटिकमणिकल्पं सर्वार्थमित्युच्यते तदनेन चित्तसारूप्येण भ्रान्ताः केचित्तदेव चेतनमित्याहुः अपरे चित्तमात्रमेवेदं

॥ . . . . अत्रत्यमेकं पत्रं न दृष्टम् ५

नीयमेतत् कथमस्ति प्रश्नमेकान्तवचनीयः सर्वो जातो मरिष्यति मृत्वा जनिष्यतो ओं भो इति अथ सर्वो जातो मरिष्यति
मृत्वा जनिष्यत इति विभज्य वचनीयमेतत्। प्रत्युदितख्यातिः क्षीणतृष्णः कुशलो न जनिष्यत इतरस्तु जनिष्यते।
तथा मनुष्यजातिः श्रेयसी न वा श्रेयसीति एवं परिपृष्टे विभज्य वचनीयः प्रश्नः पशूनुद्दिश्य श्रेयसी देवानृषींश्चाधिकृ
त्य नेति। अयन्त्ववचनीयः प्रश्नः संसारोयमन्तवानथानन्त इति कुशलस्यास्ति संसारक्रमपरिसमाप्तिर्नेतरस्येति
अन्यतरावधारणे दोषः। तस्माद्व्याकरणीय एवायं प्रश्न इति। गुणाधिकारक्रमपरिसमाप्तौ कैवल्यमुक्तं तत्स्वरूपम
वधार्यते पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ॥३४॥ कृतभोगापवर्गाणां पुरु
षार्थशून्यानां यः प्रतिप्रसवः कार्यकारणात्मनां गुणानां तत्कैवल्यं स्वरूपप्रतिष्ठा पुनर्बुद्धिसत्वानभिसम्बन्धात्पुरुषस्य
चितिशक्तिरेव केवला तस्याः सदा तथैवावस्थानं कैवल्यमिति ॥ ३४ ॥ इति श्रीपातञ्जले योगशास्त्रे सांख्यप्रवचने वै
दव्यासभाष्ये कैवल्यपादश्चतुर्थः ॥ सोमनाथशर्मणो लिपिरेषा [illegible] कोनषष्टितमे सम्वत्सरे शुक्रे
मासि सितेदले पूर्णतामगात् ॥ शम् ओम् ॥ ॥ ॥ ॥ ॥ ॥२॥

वह पुस्तक ४३७५ इस नम्बर के पुस्तक सै लिखाइया है विंशति

